ṚGVEDA SAṀHITĀ

Volume IX

ऋग्वेद संहिता

वेद प्रतिष्ठान, नई दिल्ली

ṚGVEDA SAMHITĀ

ऋग्वेद संहिता

ṚGVEDA SAMHITĀ
ऋग्वेद संहिता

with
English Translation
by
Swami Satya Prakash Sarasvati
and
Satyakam Vidyalankar

Volume IX
Book VIII, Hymns [1—40]
नवम् भागः
अष्टम् मण्डलम्, सूक्तानि [१—४०]

Veda Pratishthana
New Delhi

RGVEDA, Vol. IX

Transliteration based on the text of Theodor Aufreeht.

Rs. 250/-

Printed at :
Mayank Printers, Karol Bagh, New Delhi-110005
Ph : 5783409

CONTENTS

Foreword

by

Dr. L.M. Singhvi
Executive Chairman, Veda Pratisthana:

The Vedas enshrine the cosmic vision and vitality of our ancestors and epitomise a living legacy of divine inspiration, intuition and insight.

The glory of the Vedas is their universal and timeless quality.

The subtle and symbolic invocations of the *Sruti* and the mystic and melodic music of the celestial hymns have hallowed human consciousness through trackless centuries with a sublime glow.

The Vedas exemplify a carefully nurtured and elaborately systematized oral tradition which is unrivalled in the annals of civilization.

The evocative poetry of joyous and spontaneous affirmation of life and nature, the unravelling explorations of the seers into the terrestrial and transcendental destiny of mankind, the pervasive immanence and the pristine omnipresence of primeval reality and primordial matter, and the wisdom and philosophy of Moral and Social Order in an harmonious equilibrium unfold the luminous realm of the spirit of the Vedas.

The Vedas are unique in their perspective of time and space.

Early in the history of human civilization, the Vedas proclaimed the essential unity of mankind, untrammelled by geographical barriers and tribal parochialism.

The Vedas declared the enduring filial allegiance of Man to Mother Earth: माता भूमिः पुत्रोऽहं पृथिव्याः......अथर्व. 12.1.12.

The Vedas articulated the essential equality and intrinsically equal dignity of men and nations and the need for cooperative effort for common benefit: अज्येष्ठासो अकनिष्ठास एते, संभ्रातरो वावृधुः सौभगाय । ऋक्. 5.60.5.

The Vedas cautioned against recrimination, jealousy and ill-will among the human kindred: मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा......अथर्व. 3.30.3.

The Vedas aimed and aspired for an ambiance of unfailing and ubiquitous friendship:

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे । यजु. 36.18.

The Vedas celebrate the *vac* whose array of thousand syllables and thousand postures of consciousness manifested in a thousand ways appear as flame-songs of the earth and the empyrean. In their innermost recesses are embedded the eternal and cosmic powers of illumination. The Vedic words rising from the oceanic depths of creative consciousness provide a panoramic vision and a thousand vignettes of that real inner illumination, *svar*, reached by *dhi*, the two facets of which are *karma* (action) and *prajna* (knowledge). In that realm of invocation and sacrifice, faith (sraddha) converges with reason (tarka); intuition assimilates perception; light combines with vigour; wisdom coalesces with valour; speech and action become one. The science of Vedas seeks that true synthesis of faith and reason, and in that pursuit, its prayer is that we may be blessed with "faith" that has not degenerated into the somnolence of the spirit and that we may be endowed with "reason" that has not, in the words of Gurudeva Tagore, lost "its way into the dreary desert sand of dead habit" and which has its habitation in the meandering maze of pointless prolixity:

त्रातारो देवा अधिवोचता नो मा नो निद्रा ईशत मोत जल्पि: ।
वयं सोमस्य विश्वह प्रियास: सुवीरासो विदथमावदेम ।। ऋक्. 8.48.14.

The true Vedic faith does not countenance dogma; the Vedic reason is not a euphemism for sophistry; the Vedic word is not a victim of verbiage. The essential perception of the Vedas is not a prisoner of perversions. The humanism of Vedas is not a hypocrisy and the Vedic teaching of tolerance is not a transient contrivance. The core commitment of Vedas is to truth and *dharma*, to harmony and happiness, to freedom and justice. The soulful Vedic voyage in ceaseless quest of the experience of inner illumination and with its rich symbolism and manifold meanings is perhaps the oldest and the most magnificent and many-splendoured pilgrimage of the human spirit.

The Vedas gave the *Magna Carta* of Human Brotherhood and Universal Goodwill and proclaimed a noble prayerful Preamble to the humanitarian Constitution of One World based on friendship, fellow-feeling, freedom and fearlessness in words which are immortal and ever inspiring and which are central to the basic teleology and technology of building impregnable defences of peace in the minds of men. The Vedic seers who viewed the world of perception and the world of thought as a continuum prayed for the composite benediction of hearing noble thoughts and seeing noble deeds: भद्रं कर्णेभि: श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा: । यजु. 25.21

In that endeavour of building a universe of noble thoughts and noble deeds, the Vedic seers convened a cosmic convocation based

on the fundamental human quest for truth and the acceptance of its many facets (एकं सद् विप्राः बहुधा वदन्ति):

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे ॥ ऋक्. 1.89.1.

In the Vedic vision of human society, man in his relation to man was not predatory, aggressive and oppressive as in the Hobbesian nightmare which conjured up *homo homini lupus*. The Vedic ideal was that Man was under an obligation to protect and preserve and to aid and comfort mankind everywhere: पुमान् पुमांसं परिपातु विश्वतः । ऋक्. 6.75.14.

The Vedic philosophy of freedom and fearlessness reached a credal and climactic crescendo in the earthy yet ethereal invocations:

अभयं मित्रादभयमित्रादभयं ज्ञातादभयं परोक्षात् ।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ॥ अथर्व. 19.15.7

Equally, the Vedic hymn of *togetherness* remains a refreshing reminder and a beacon light to the fractured and fragmented world out of whose womb the new world order is struggling to be born:

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥ ऋक्. 10.191.2.

These noble thoughts made the culture of the Vedas the first and foremost foundation of the edifice of universal values: सा प्रथमा संस्कृतिर्विश्ववारा । यजु. 7.14.

These enduring verities of the Vedas are not a relic of the past, nor are they the exclusive preserve or the sole inheritance of Indians and Indo-Aryans. They belong to the common heritage of humanity and are relevant in our contemporary world and in our age. We owe it to ourselves and to the peoples and the nations of the world to share this precious heritage and to disseminate its message and meaning.

It is the proud privilege of Veda Pratisthana to be the chosen instrument of the monumental project for preparing and presenting a readable and systematic modern translation of all the four Vedas. The Veda Pratisthana has had the credentials and the capacity to attempt this ambitious task because it was founded on the deep understanding and encyclopaedic erudition of Swami Satya Prakashji, an eminent scientist and a distinguished professor before he became a *parivrajaka*, the firm financial support and the bounteous benefaction of Narendra Mohan Foundation, an eloquent and tangible testament of the Mohan family's liberal and public-spirited disposition, and of the intrepid faith, fortitude, vision and dedication of the late Shri Prakash Vir Shastri.

The munificence of Major Kapil Mohan and his family and their deep devotion to the cause of Vedic learning enabled the Veda Pratisthana to embark on this noble enterprise. It was Major Kapil Mohan's resolve to raise a truly meaningful memorial in the form of a new edition of the Vedas in remembrance of his elder brother, the late Col. Ved Ratan Mohan that led the Narendra Mohan Foundation to offer its generous and unsparing financial assistance for this project. We acknowledge our debt of gratitude to Major Kapil Mohan and to Narendra Mohan Foundation. We also take this opportunity to pay our tribute to the memory of Col. Ved Ratan Mohan whose life was a superb saga of service and an inexhaustible treasury of goodwill.

The late Shri Prakash Vir Shastri was the main architect of Veda Pratisthana. It was to him that we owed the initial organization, the basic conception and the purposeful momentum of the project. Indeed, we are only trying to translate his dream into a reality. An eminent and gifted parliamentarian, whose cascading eloquence, sparkling wit, mature wisdom and intrinsic goodness had a singular charm, Parkash Vir Shastri was an articulate exponent and a selfless missionary of the fundamental values of India's creative and spiritual culture. Spun and woven with the warp and woof of Indian sensitivity and perception, the tapestry of his life and work was as authentic as it was inspiring. He shunned the pettiness and parochialism of politics and strove to reinforce our national life with the tensile strength of our quintessential heritage. He lived and worked for national goals. In national politics he was the ambassador of the larger cultural claims on life. In his tragic and untimely death, Mother India lost an illustrious son who distinguished himself not by the office he held, nor by his wealth or material acquisitions, but by his dedicated and singleminded service to the cause of the nation. In his death, Veda Pratisthana lost its moving spirit, regained mainly because his memory is a motive force. We savour the exhilarating fragrance and see the inspiring and exhorting presence of his personality, pervasive, permeating and perdurable, in the fruition of this project and pay our affectionate homage to his everlasting memory.

Deepavali, 1978.

PREFACE TO IIND EDITION

I feel proud in bringing out this second edition of the RGVEDA SAMHITA within a period of eighteen years. The first edition of the RGVEDA SAMHITA was published in 1977.

The Ved Pratisthana–publishers of the English translation of the Vedas was founded in 1973. The late Shri Prakash Vir Shastri was the main Architect of Veda Pratisthana. Of course, we are only trying to translate his dream into a reality. Its first President Dr. Govardhan Lal Datta requested Swami Satya Prakashji to undertake the assignment of Chief Editorship of this project and appointed Pandit Satyakam Vidyalankar to assist Shri Swamiji in this work. The work started immediately and it took full ten years to complete the thirteen volumes of the Rig-Veda.

After the sad demise of Dr. Govardhan Lal Datta, the Veda Pratisthana has been fortunate enough to have Dr. Lakshmi Mal Singhvi as its President. At present Dr. Singhvi has gone on his new assignment to United Kingdom to serve as the High Commissioner for India.

After completing the translation and publishing RIG-VEDA, the Ved Pratishthana took up the work of the YAJUR VEDA and SAMA VEDA. Shri Udaya Veer Viraj assisted Swamiji in the YAJURVEDA and Pandit Satyakama Vidyalankar in the translation of the SAMA VEDA. In the

meantime Swamiji has left Delhi for Allahabad on account of his protracted illness. He is now 90 years old and feeble.

The English translation of the ATHARVA VEDA has been assisted by Shri Udaya Veer Viraj, a distinguished graduate of Gurukul Kangri.

I take this opportunity to thank revered Swamiji and his team of translators. There might be many other friends in this project like our young and energetic Shri Ajay Sehgal, who is looking after the Veda Pratisthan now a days, and to whom I owe a word of appreciation. On this occasion my thoughts go to the memory of late Shri Prakash Veer Shastri, Dr. G.L. Datta and Shri R.S. Ahuja, who were associated with the project very closely.

DARBARI LAL
President
(Veda Pratisthana)

ऋग्वेद संहिता

ṚGVEDA SAMHITA

ऋग्वेद संहिता

अष्टमं मण्डलम्

---

(१) प्रथमं सूक्तम्

(१-३४) चतुस्त्रिंशदृचस्यास्य सूक्तस्य (१-२) प्रथमाद्वितीययोर्ऋचोर्घोरः काण्वः प्रगाथः. (३-२९) तृतीयादिसप्तविंशतेः काण्वौ मेधातिथिमेध्यातिथी. (३०-३३) त्रिंश्यादिचतसृणां प्लायोगिरासङ्ग ऋषयः. (३४) चतुस्त्रिंश्याश्चाङ्गिरसी शश्वती ऋषिका । (१-२९) प्रथमाद्येकोनत्रिंशदृचामिन्द्रः. (३०-३४) त्रिंश्यादिपञ्चानाश्चासङ्गो देवता । (१-४) प्रथमादिचतसृणां प्रगाथः (विषमर्चा बृहती, समर्चा सतोबृहती), (५-३२) पञ्चम्याद्यष्टाविंशतेर्बृहती. (३३-३४) त्रयस्त्रिंशीचतुस्त्रिंश्योश्च त्रिष्टुप् छन्दांसि ॥

॥१.०॥ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥२॥

1.

Má cid anyád ví ṣaṅsata sákhāyo má rishaṇyata | índram ít stotā vṛíshaṇaṃ sácā suté múhur ukthá ca ṣaṅsata || 1 || avakrakshíṇaṃ vṛishabháṃ yathājúraṃ gáṃ ná carshaṇīsáham | vidvéshaṇaṃ saṃvánanobhayaṃkarám máṅhishṭham ubhayāvínam || 2 ||

RGVEDA SAMHITĀ

BOOK EIGHT

1

O friends, do not worship anybody but Him, the divine one. Let no grief perturb you. Praise Him alone, the radiant, the showerer of benefits. During the course of self-realization, go on repeatedly uttering hymns in His honour. 1

He, the resplendent Lord, rushes down upon enemies like a bull, is undecaying like earth, is the hater (of adversaries), is venerable, is capable of being both,—a foe or a friend; he is bounteous, and the distributor of both material and spiritual prosperity. 2

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम ॥३॥
वि तर्तूर्यन्ते मघवन्विपश्चितोऽर्यो विपो जनानाम ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥४॥

yác cid dhí tvā jánā imé nā́nā hávanta ūtáye | asmā́kam bráhmedám indra bhūtu té 'hā víṣvā ca várdhanam || 3 || ví tartūryante maghavan vipaṣcíto ''ryó vípo jánānām | úpa kramasva pururū́pam ā́ bhara vā́jam nédishṭham ūtáye || 4

महे चन त्वामद्रिवः परा शुल्काय देयाम ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥५॥

mahé caná tvā́m adrivaḥ párā ṣulkā́ya deyām | ná sahásrāya nā́yútāya vajrivo ná ṣatā́ya ṣatāmagha || 5 || 10 ||

॥११॥

वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥६॥
क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत्पुरन्दर प्र गायत्रा अगासिषुः ॥७॥

vásyā̃n indrāsi me pitúr utá bhrā́tur ábhuñjataḥ | mātā́ ca me chadayathaḥ samā́ vaso vasutvanā́ya rā́dhase || 6 || kvèyatha kvéd asi purutrā́ cid dhí te mánaḥ | álarshi yudhma khajakṛit puraṃdara prá gāyatrā́ agāsishuḥ || 7 ||

O glorious Lord, all your devotees in sundry ways invoke you, seeking your protection. May this sacred prayer, addressed to you by us, glorify you every day. 3

O bounteous Lord, these wise devotees of yours, the overcomers and terrifiers of foes, easily overcome all the obstacles (by your grace). Pray, do come near us and bring us strength in varied forms, so that it may protect us. 4

O opulent Lord, mighty as thunder, the wielder of adamantine justice, I shall not sell my devotion to you for all the wealth in the world, not for a hundred, nor for a thousand, nor for a million, for you are Lord of countless wealth. 5

O resplendent Lord, you are much more to me than what my ancestors, or non-affectionate brothers are. O all pervading one, you are dear to me like my mother and I owe to both of you for my celebrity and riches. 6

Where indeed are you now? Whither have you gone? Verily, your mind must be wandering amongst many. O veteran among the warriors, the destroyer of the citadels of ignorance, please come here, where the chanters are singing your praises. 7

प्रास्मै गायत्रमर्चत वावातुर्यः पुरन्दरः ।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥८॥
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥९॥

prásmai gāyatrám arcata vāvátur yáḥ puraṃdaráḥ | yāɒniḥ kāṇvásyópa barhír āsádaṃ yā́sad vajrí bhinát púraḥ || 8 || yé te sánti daṣagvínaḥ ṣatíno yé sahasríṇaḥ | áṣvāso yé te vṛíshaṇo raghudrúvas tébhir nas tū́yam ā́ gahi || 9 ||

आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥१०॥

á tv àdyá sabardúghāṃ huvé gāyatrávepasam | índraṃ dhenúṃ sudúghām ányāṃ ísham urúdhārām araṃkṛítam || 10 || 11 ||

॥१२॥

यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥११॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता सन्धिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥१२॥

yát tudát sū́ra étaṣaṃ vaṅkū́ vā́tasya parṇínā | váhat kútsam ārjuneyáṃ ṣatákratuḥ tsárad gandharvám ástṛitam || 11 || yá ṛité cid abhiṣríshaḥ purá jatrúbhya ātṛídaḥ | sáṃdhātā saṃdhím magháva purūvásur íshkartā víhrutam púnaḥ || 12 ||

O devotees, sing out psalms in His honour, who destroys the citadels of ignorance, causing impediments in the way of His worshippers. May the mighty thundering Lord come to bless the sacrifice of the family of people of wisdom and learning, and to destroy the fortresses of Nescience. 8

O Lord, come speedily to us with all your fleet—footed horses, moving in all the ten quarters; come with such your horses as are capable of traversing through tens, hundreds,and thousands (of leagues). 9

I hasten to invoke Him, who is comparable to the richly-yielding milch-cow, and who provides unfailing food in ample streams. 10

When the fruit-giver creator Lord provides to the soul, according to its merits, the rolling-winged chariot of body with two horses (one, the internal organ, secondly, the band of sense organs), moving with the speed of wind along the zig-zag paths, He, the performer of hundreds of selfless tasks, is also pleased to accompany the soul, the child of Nature, in the world to help it all through its life. 11

The bounteous Lord is a great healer. He, even before injury to neck or any part, is afflicted, confers capacity in the body to heal up the wound and closes the injured part, and hastens the recovery. He, the bounteous Lord, without ligature or healing material, closes up the wound again before making incision in the neck or any injured part and makes whole the dissevered part. 12

मा भूम निष्ट्या इवेन्द्र त्वदरणा इव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१३॥
अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥१४॥

má bhūma níshṭya ivéndra tvád áraṇā iva | vánāni ná prajahitány adrivo duróshāso amanmahi || 13 || ámanmahíd anāṣávo 'nugrásaṣ ca vṛitrahan | sakṛít sú te mahatá ṣūra rádhasánu stómam mudīmahi || 14 ||

यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥१५॥

yádi stómam máma ṣrávad asmákam índram índavaḥ | tiráḥ pavítram sasṛiváṅsa āṣávo mándantu tugryāvṛídhaḥ || 15 || 12 ||

॥१३॥

आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥१६॥
सोता हि सोममद्रिभिरेमेनमप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥१७॥

á tv àdyá sadhástutim vāvátuḥ sákhyur á gahi | úpastutir maghónām prá tvāvatv ádhā te vaṣmi sushṭutím || 16 || sótā hí sómam ádribhir ém enam apsú dhāvata | gavyá vástreva vāsáyanta ín náro nír dhukshan vakshánā-bhyaḥ || 17 ||

O resplendent Lord, blessed by you, may we be never like the one cast down or be stranger to you. May we, O thunderer, never count ourselves as branchless trees, rejected and neglected, not even accepted for burning purposes. We all glorify you. 13

O destroyer of darkness, whilst we offer you our prayers, may we be neither hasty nor perturbed. Bless us so that we may, at least for once, have delight in your bounty after praising you with sincerity. 14

In case, the resplendent Lord has listened to my laudations, then the emotional expressions of mine would surely gladden the Lord, as the drops of elixir passing through a filter and diluted with consecrated water. 15

Please come now today to accept the collective tributes of your devoted friends. May the praises of our wealthy nobles delight you. And now it is my turn to sing to you the fine eulogy. 16

O devotees, express out of your heart the loving devotion by bruising it, as if, through the stones of the vital breaths, and wash it with consecrated waters flowing through the inner conscience. This is also the process by which in the cosmic world, the leaders (cloud-bearing winds) clothing the sky with clouds, as with a raiment of a cowhide milk forth water for the rivers. 17

अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥१८॥
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥१९॥

ádha jmó ádha vā divó bṛiható rocanā́d ádhi | ayā́ vardhasva tanvā̀ girā́ mámā́ jātā́ sukrato pṛiṇa || 18 || índrāya sú madíntamaṃ sómaṃ sotā váreṇyam | ṣakrá eṇam pīpayad víṣvayā dhiyā́ hinvānáṃ ná vājayúm || 19 ||

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥२०॥

mā́ tvā sómasya gáldayā sádā yā́cann aháṃ girā́ | bhū́rṇim mṛigáṃ ná sávaneshu cukrudhaṃ ká íṣānaṃ ná yācishat || 20 || 13 ||

॥१४॥

मदेनेषितं मदमुग्रमुग्रेण शवसा ।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥२१॥
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥२२॥

mádeneshitám mádam ugrám ugréṇa ṣávasā | víṣveshāṃ tarutā́ram madacyútam máde hí shmā dádāti naḥ || 21 || ṣévāre vā́ryā purú devó mártāya dāṣúshe | sá sunvaté ca stuvaté ca rāsate viṣvágūrto arishṭutáḥ || 22 ||

Whether you come from earth or from the interspace, or from the lustre of the lofty heaven, please be magnified by listening to our prayers. O Lord of good deeds, may you fulfil the aspirations of our people. 18

O devotees, may you pour out for Him your most gladdening exhilarations and excellent devotions. May the almighty Lord bless our every prayer with success, with wealth and strength. 19

May we, while pouring the elixir of devotional love to you at the sacrifice, not provoke you to anger, as one excites a wild beast. Who would not beseech Him who has power to grant all wishes ? 20

May the stream of our devotional love be swift and full of rapturous joy; may it be effectual with its mighty strength; may it be all-conquering and pure. Let our Lord drink it and in ecstasy give us His blessings. 21

The all-praised Lord, glorified by pious devotees, bestows great wealth upon the mortal worshipper, who is benevolent to all and who prays for the universal good. 22

एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥२३॥
आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥२४॥

éndra yāhi mátsva citréṇa deva rā́dhasā | sáro ná prāsy udáram sápītibhir ā́ sómebhir urú sphirám || 23 || ā́ tvā sahásram ā́ ṣatám yuktā́ ráthe hiraṇyáye | brahmayújo háraya indra keṣíno váhantu sómapītaye || 24 ||

आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२५॥

ā́ tvā ráthe hiraṇyáye hárī mayū́raṣepyā | ṣitipṛishṭhā́ vahatām mádhvo ándhaso vivákshaṇasya pītáye || 25 || 14 ||

पिबा त्वस्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥२६॥
य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥२७॥

píbā tv àsyá girvaṇaḥ sutásya pūrvapā́ iva | párishkṛitasya rasína iyám āsutíṣ cā́rur mádāya patyate || 26 || yá éko ásti daṅsánā mahā́ñ ugró abhí vratáiḥ | gámat sá ṣiprī́ ná sá yoshad ā́ gamad dhávam ná pári varjati || 27 ||

O glorious God, come and reside within us. Shower on us various kinds of wealth. May your vast capacious universe be filled with your divine love as the lake is filled with streams of water. 23

O resplendent Lord, a thousand and a hundred steed-like forces are harnessed to your golden-chariot,—to this rolling universe. So, may the long-ranged bounties, yoked by devotion, bring the Lord to accept the draught of our loving devotion. 24

On your chariot, wrought of gold and yoked with two horses, peacock – tailed, white backed, may you come – O resplendent Lord, to accept the elixir of devotional love. 25

O lover of chants, may you drink this consecrated and juicy libation of devotional love like the first drinker. This excellent effusion of excellent emotion is meant to gladden you. 26

He alone is supreme, is accomplisher of wondrous deeds and is terribly firm in His law and order. May He, the charming one, be attainable to me; may He never be away from me; may He come near to me; may He never refuse my invocations. 27

त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥२८॥
मम त्वा सूर उदिते मम मध्यन्दिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥२९॥

tvám púraṃ carishṇvàṃ vadhaíḥ ṣúshṇasya sám piṇak | **tvám** bhā́ ánu caro ádha dvitā́ yád indra hávyo bhúvaḥ || 28 || **máma** tvā sū́ra údite máma madhyáṃdine diváḥ | **máma** prapitvé apiṣarvaré vasav ā́ stómāso avṛitsata || 29 ||

स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।
निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥३०॥

stuhí stuhíd eté ghā te máṅhishṭhāso maghónām | ninditā́ṣvaḥ prapathí paramajyā́ maghásya medhyātithe || 30 || 16 ||

आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।
उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥३१॥
य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।
एष विश्वान्यभ्यस्तु सौभगासंगस्य स्वनद्रथः ॥३२॥

ā́ yád áṣvān vánanvataḥ ṣraddháyāháṃ ráthe ruhám | **utá** vāmásya vásunaṣ ciketati yó ásti yádvaḥ paṣúḥ || 31 || **yá** ṛijrā́ máhyam māmahé sahá tvacā́ hiraṇyáyā | eshá víṣ-vāny abhy àstu saúbhagāsaṅgásya svanádrathaḥ || 32 ||

O resplendent Lord, you crush to pieces the strongholds of exploiters with your tremendous power of destruction. You are light; and the light follows you. And thus you are to be worshipped in two ways. 28

O all-pervading one, accept my invitation to prayers at the time of sun-rise; at the time of noon, and at the time of the gloom of night. 29

Praise me; offer prayer to me. I, among the wealthy ones, am the most liberal donor of wealth to you. Let all the prayers be directed to me, O the venerable guest as one who outstrips a horse in speed and follows a right path and bears the best weapons. 30

Only when a person yokes his horses of senses to his body-chariot with devotional faith in me, I get into his car, and the devotee looks to the immense spiritual wealth. Verily, one who sees thus is the dwelling seer amongst men. 31

Whosoever dedicates to me his worldly riches of gold and the like, as if in attractive leather cases, may that liberal giver be the possessor of the rattling chariot and all the blessings. 32

अध प्लायोगिरति दासदन्यानासङ्गो अग्ने दशभिः सहस्रैः ।
अधोक्षणो दश मह्यं रुशन्तो नळा इव सरसो निरतिष्ठन् ॥३३॥
अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।
शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥३४॥

-ádha **plā́yogir áti dāsad anyā́n āsaṅgó agne daṣábhiḥ sahásraiḥ | ádhokshā́ṇo dáṣa máhyaṃ rúṣanto naḷā́ iva sáraso nír atishṭhan || 33 || ánv asya sthūrā́m dadṛiṣe purástād anasthá ūrúr avarámbamāṇaḥ | ṣáṣvatī nā́ry abhicákshyāha súbhadram arya bhójanam bibharshi || 34 || 16 ||**

(२) द्वितीयं सूक्तम्

(१-४२) द्विचत्वारिंशदृचस्यास्य सूक्तस्य (१-४०) प्रथमादिचत्वारिंशदृचां काण्वो मेधातिथिराङ्गिरसः प्रियमेधश्च, (४१-४२) एकचत्वारिंशीद्विचत्वारिंश्योश्च काण्वो मेधातिथिर्ऋषी । (१-४०) प्रथमादिचत्वारिंशदृचामिन्द्रः, (४१-४२) एकचत्वारिंशीद्विचत्वारिंश्योश्च विभिन्दोर्दानस्तुतिर्देवते । (१-२७, २९-४२) प्रथमादिसप्तविंशत्यृचामेकोनत्रिंश्यादिचतुर्दशानाञ्च गायत्री, (२८) अष्टाविंश्याश्चानुष्टुप् छन्दसी ॥

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन्ररिमा ते ॥१॥
नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥२॥
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मिन्त्सधमादे ॥३॥
इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः । अन्तर्देवान्मर्त्यांश्च ॥४॥
न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ॥५॥

2.

Idáṃ vaso sutám ándhaḥ píbā súpūrṇam udáram | ánābhayin rarimā́ te || 1 || nṛíbhir dhūtáḥ sutó áṣnair ávyo vā́raiḥ páripūtaḥ | áṣvo ná niktó nadíshu || 2 || tā́ṃ te yávaṃ yáthā góbhiḥ svādúm akarma ṣrīṇántaḥ | índra tvāsmín sadhamā́de || 3 || índra ít somapā́ éka índraḥ sutapā́ viṣvā́yuḥ | antár devā́n mártyāṅṣ ca || 4 || ná yáṃ ṣukró ná dúrāṣīr ná tṛiprā́ uruvyácasam | apaspṛiṇvaté suhā́rdam || 5 || 17 ||

O adorable Lord, conductor of all the projects and dweller within every one, in your liberality, you surpass others by tens of thousand times. To me, you have graciously given ten times the number of vigorous and bright-hued oxen, as if issued forth like lotus-stalks from out a lake. 33

When the intellect, a constant companion of the soul, perceives the truth, with joy he exclaims : 'now you are well, my Lord, and shall be really happy'. Then only the soul realizes perfect restoration of its lost wisdom. 34

2/1

Here is the elixir of devotion expressed, O Lord of riches, drink it to your full satisfaction. O undaunted Lord, we offer it to greet you. 1

It (devotional elixir) is pure, as if washed by priests, pressed out with hard work and strained through the filter (of pious thoughts). It is like a courser bathed in a stream of river. 2

We make this elixir of devotion sweet for you, as the barley cereal is blended with milk; and therefore, O resplendent, I call you to partake the sacred oblation we have offered. 3

Beloved of all, the resplendent Lord is the chief drinker of this elixir of devotion among Nature's bounties and men; He alone is the drinker of the effused libation. 4

He is far-extending and kind-hearted. Neither the brilliant-hued elixir, nor the difficultly prepared mixture from it, nor any other satiable (offering) becomes repulsive to Him. 5

गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते । अभित्सरन्ति धेनुभिः ॥६॥
त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य । स्वे क्षये सुतपाव्नः ॥७॥
त्रयः कोशासः श्चोतन्ति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भार्मन ॥८॥

góbhir yád īm anyé asmán mṛigáṃ ná vrā́ mṛigáyante | abhitsáranti dhenúbhiḥ || 6 || tráya índrasya sómāḥ sutā́saḥ santu devásya | své ksháye sutapávnaḥ || 7 || tráyaḥ kóṣā-sa ṣcotanti tisráṣ camvàḥ súpūrṇāḥ | samāné ádhi bhā́r-man || 8 ||

शुचिरसि पुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः । दध्ना मन्दिष्ठः शूरस्य ॥९॥
इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचन्ते ॥१०॥

ṣúcir asi purunishṭháḥ kshīraír madhyatá ā́ṣīrtaḥ | dadhnā́ mándishṭhaḥ ṣū́rasya || 9 || imé ta indra sómās tīvrā́ asmé sutā́saḥ | ṣukrā́ āṣíram yācante || 10 || 18 ||

ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि । रेवन्तं हि त्वा शृणोमि ॥११॥
हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम । ऊधर्न नग्ना जरन्ते ॥१२॥
रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥१३॥
उक्थं चन शस्यमानमगोररिरा चिकेत । न गायत्रं गीयमानम ॥१४॥

tā́ñ āṣiram puroḷā́ṣam índremaṃ sómaṃ ṣrīṇīhi | revántaṃ hí tvā ṣriṇómi || 11 || hṛitsú pītā́so yudhyante durmádāso ná súrāyām | ū́dhar ná nagnā́ jarante || 12 || revā́ñ íd revátа stotā́ syā́t tvā́vato maghónaḥ | préd u harivaḥ ṣru-tásya || 13 || ukthám caná ṣasyámānam ágor arír ā́ ciketa | ná gāyatráṃ gīyámānam || 14 ||

As a hunter goes in search of a deer, the wise man proceeds to seek Him either by the offerings of milk and milk products or by prayers through divine speech. 6

May the three libations—elixir of three regions—be effused from the divine resplendent Lord in His own dwelling, for, verily, He is the cherisher of this celestial elixir. 7

Three reservoirs exude their drops; three ladles are filled to the brim; the whole is furnished for one common sacrifice. 8

You are pure, set in many a place, and blended with milk for the midday offering and with curd at the evenings to delight the most magnanimous Lord. 9

O resplendent Lord, here is your pure and strong elixir of devotion expressed by us for you. We crave, you mix milk and cream to it. 10

O resplendent Lord, may you blend milk and cakes with the elixir, I hear that you are possessed of riches. 11

The drinkers, quaffed with spiritual drink, fight in the state of intoxication to their hearts' content. They get absorbed in their passion for Lord, just as an innocent child clings to mother's udder. 12

O opulent Lord of vital forces, may your praiser be rich, munificent and renowned like you; may he be richer than other rich and renowned persons. 13

(The resplendent Lord), the enemy of the unbeliever in the words—divine, apprehends whatever prayer is repeated and whatever chant is being chanted. 14

मा न इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥१५॥

má na indra pīyatnáve má
ṣárdhate párā dāḥ | ṣíkshā ṣacīvaḥ ṣácībhiḥ || 15 || 19 ||

॥२०॥ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥१६॥
न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥१७॥
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ॥१८॥
ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्यस्मान् । महाँ इव युवजानिः ॥१९॥
मो ष्वद्य दुर्हणावान्त्सायं करदारे अस्मत् । अश्रीर इव जामाता ॥२०॥

vayám u tvā tadídarthā índra tvāyántaḥ sákhāyaḥ | káṇvā ukthébhir jarante || 16 || ná ghem anyád á papana vájrinn apáso návishṭau | távéd u stómam ciketa || 17 || ichánti deváḥ sunvántam ná svápnāya sprihayanti | yánti pramádam átandrāḥ || 18 || ó shú prá yahi vájebhir má hriṇīthā abhy àsmán | maháñ iva yúvajāniḥ || 19 || mó shv àdyá durháṇavān sāyáṃ karad āré asmát | aṣrīrá iva jámātā || 20 || 20 ||

॥२१॥ विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् । त्रिषु जातस्य मनांसि ॥२१॥
आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् । यशस्तरं शतमूतेः ॥२२॥
ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय । भरा पिबन्नर्याय ॥२३॥

vidmá hy àsya vīrásya bhūridávarīṃ sumatím | trishú jātásya mánāṅsi || 21 || á tú shiñca káṇvamantaṃ ná ghā vidma ṣavasānát | yaṣástaraṃ ṣatámūteḥ || 22 || jyéshṭhena sotar índrāya sómaṃ vīrāya ṣakrāya | bhárā píban náryāya || 23 ||

O resplendent Lord, please do not hand us over as a prey to the tyrant or to an overpowering foe. O almighty, please instruct us with your might and power. 15

O resplendent Lord, we implore as your devoted friends, for the same purpose, as the most wise men praise you with sacred hymns. 16

O wielder of the bolt of justice, certainly I do not ever sing songs in the praise of any one else than yourself, while performing any deed or contemplating any thought. 17

Nature's bounties favour those who are active in work and do not indulge in sleep. They bless those who are not drowsy and who realize the ecstasy of joy. 18

May you come hither swiftly bringing your gifts of wealth with you. May you not be bashful like an ardent husband who has a new young bride. 19

May He the insuperable, delay not to come to us today till late in the evening like an unpleasant son-in-law. 20

We fully understand the wide generosity and good intentions of this brave Lord, whom all the three regions display. 21

Hurry up to pour forth all your devotion to Him, who is associated with wise men; for we know not anybody else who is more glorious than the mighty Lord, the bestower of countless aids. 22

O pious devotee, may you offer your loving devotion first to the resplendent Lord, brave and almighty, the friend of mankind so that He may be pleased to accept it. 23

यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः । वाजं स्तोतृभ्यो गोमन्तम ॥२४॥
पन्यंपन्यमित्सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥२५॥

yó védishṭho avyathíshv áṣvāvantam jaritṛíbhyaḥ | vájam stotṛíbhyo gómantam || 24 || pányam-panyam ít sotāra á dhāvata mádyāya | sómam vīrāya ṣúrāya || 25 || 21 ||

पाता वृत्रहा सुतमा घा गमन्नारे अस्मत । नि यमते शतमूतिः ॥२६॥
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम । गीर्भिः श्रुतं गिर्वणसम ॥२७॥

pata vṛitrahá sutám á gha gaman naré asmát | ní yamate ṣatámutiḥ || 26 || éhá hári brahmayúja ṣagmá vakshataḥ sákhayam | girbhíḥ ṣrutám gírvaṇasam || 27 ||

स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम ॥२८॥
स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय । इन्द्र कारिणं वृधन्तः ॥२९॥
गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि । सत्रा दधिरे शवांसि ॥३०॥

svadávaḥ
sóma a yāhi ṣrītáḥ soma a yāhi | ṣíprinn ṛíshīvaḥ ṣácīvo náyám ácha sadhamádam || 28 || stútaṣ ca yás tva várdhanti mahé rádhase nṛimṇaya | índra kāríṇam vṛidhántaḥ || 29 || gíraṣ ca yás te girvāha ukthá ca túbhyam tani | satrá dadhiré ṣávaṅsi || 30 || 22 ||

He, in Ḥis untroubled ways, is the most cognizant of merits of His devotees and confers to vigorous and intellectual new vigour, intellect and food. 24

O devotees, prepare for Him the elixir, each draught of which you have made as relishing as you could. For it is to be offered to the brave, the conqueror and the showerer of joy. 25

Lord, the destroyer of evils, drinks this elixir of spiritual joy. May He who gives to us hundreds of aids be constantly with us, and not stay afar. 26

May the strong dedicated vital forces, yoked by devotional hymns, bring hither unto us our friend, who is lover of laudations, renowned by songs. 27

Sweet are these elixirs of devotional love. O Lord, handsome in appearanee, foremost seer, and full of divine wisdom. Come at the social exhilarating congregation and accept them which are nicely blended and flavoured. 28

O resplendent Lord, performer of glorious deeds, your devotees chant laudations in your honour to seek your blessings of wealth and valour. The tributes add to your glory. 29

O lover of songs, these chants are for you and for you are these hymns of prayers. They, all combined, ever more confirm your power. 30

॥२३॥ एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः । सनादमृक्तो दयते ॥३१॥
हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः ॥३२॥
यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च । अनु घेन्मन्दी मघोनः ॥३३॥

evéd eshá tuvikurmír vájan éko vájrahastaḥ | sanád ámṛikto dayate || 31 || hánta vṛitrám dákshiṇenéndraḥ purú puruhutáḥ | mahán mahíbhiḥ śácíbhiḥ || 32 || yásmin víśvaś carshaṇáya utá cyautná jráyaṁsi ca | ánu ghén mandí maghónaḥ || 33

एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे । वाजदावा मघोनाम् ॥३४॥
प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति । इनो वसु स हि वोळ्हा ॥३५॥

eshá etáni cakaréndro víśva yó 'ti śṛiṇvé | vájadáva maghónam || 34 || prábharta rátham gavyántam apakác cid yám ávati | inó vásu sá hí vóḷha || 35 || 23 ||

॥२४॥ सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः । सत्योऽविता विधन्तम् ॥३६॥
यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा । यो भूत्सोमैः सत्यमद्वा ॥३७॥
गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम् । कण्वासो गात वाजिनम् ॥३८॥

sánitā vípro árvadbhir hántā vṛitrám nṛíbhiḥ śúraḥ | satyó 'vitá vidhántam || 36 || yájadhvainam priyamedhā índraṃ satrácā mánasā | yó bhút sómaiḥ satyámadvā || 37 || gāthásravasaṃ sátpatiṃ śrávaskāmam purutmánam | káṇvāso gātá vājínam || 38 ||

This resplendent Lord is the sole performer of various great deeds. He has never been subdued. He holds resolute will-power and it is He who gives us strength. 31

He, the resplendent Lord, the slayer of Nescience by His right hand, is invoked by all on all occasions; He is great with His might divine. 32

He, upon whom the entire human community depends and in whom all initial motive powers and over-whelming energies abide, takes pleasure in our affluence. 33

The resplendent Lord has been accomplishing all these acts, and as such, He is most gloriously renowned. He provides persons rich in liberality with further opulence. 34

Such people who invoke the divine provider, for attractive spiritual wealth and for protection against an immature (foe), become lord, the possessors of wealth. 35

He is the liberal giver, wise, borne by His own vital forces, the slayer of the wicked instincts with the aid of pious mortals, and is brave. He is truthful and He becomes a protector of people who render useful service. 36

O performers of auspicious works, worship Him with mind intent upon His glory, for He really becomes exhilarated when He receives from you the elixir of devotional love. 37

O wise learned devotees, may you sing praises to Him, who is glorified by sons, is the protector of the pious, lover of fame, all-pervading and full of wisdom. 38

य ऋते चिद्गास्पदेभ्यो दात्सखा नृभ्यः शचीवान् । ये अस्मिन्काममश्रियन् ॥३९॥
इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् । मेषो भूतो३ऽभि यन्नयः ॥४०॥
शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत् । अष्टा परः सहस्रा ॥४१॥
उत सु त्ये पयोवृधा माकी रणस्य नप्त्या । जनित्वनाय मामहे ॥४२॥

yá ṛité cid gás padébhyo dát sákhā nṛíbhyaḥ ṣácīvān | yé asmin kamam aṣriyan || 39 || itthá dhívantam adrivaḥ kāṇvám médhyātithim | meshó bhūtò 'bhí yánn áyaḥ || 40 || ṣíkshā vibhindo asmai catváry ayúta dádat | ashṭá paráḥ sahasrā || 41 || utá sú tyé payovṛídha mākí ránasya naptyā́ | janitvanáya mamahe || 42 || 24 ||

३) तृतीयं सूक्तम्

(१-२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य काण्वो मेध्यातिथिर्ऋषिः । (१-२०) प्रथमादिविंशत्यृचामिन्द्रः (२१-२४) एकविंश्यादिचतसृणाञ्च कौरयाणस्य पाकस्थाम्नो दानस्तुतिर्देवता । (१-२०) प्रथमादिविंशत्यृचां प्रगाथः (विषमा बृहती, समा सतोबृहती). (२१) एकविंश्या अनुष्टुप् . (२२-२३) द्वाविंशीत्रयोविंश्योर्गायत्री. (२४) चतुर्विंश्याश्च बृहती छन्दांसि ॥

॥२५॥ पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवन्तु ते धियः ॥१॥
भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥२॥

3.

Píbā sutásya rasíno mátsvā na indra gómataḥ | āpír no bodhi sadhamadyo vṛidhè 'smáñ avantu te dhíyaḥ || 1 || bhūyáma te sumataú vājíno vayám ma na star abhímātaye | asmáñ citrabhir avatād abhíshṭibhir á nah sumnéshu yāmaya || 2 ||

He is the one who is friendly to all, powerful and who without footprints has been able to trace, recover and restore cattle to their owners, who thus all depend for fulfilment of their aspirations to Him alone. 39

O wielder of the bolt of justice, may you proceed to the venerable guest, wise and pious in a most friendly form. 40

O vanquisher of enmity and liberal giver, may you give us a gift of a large fortune of four times ten thousand and further eight thousand. 41

I glorify for the sake of wedlock these two, the earth and heaven, augmenters of milk, the originators of creation and promotors of splendrous imperishable things. 42

O resplendent Lord, may you accept our delightful elixir, mingled as if with milk, and get exhilarated. Please consider yourself as our kith and kin. May we both enjoy the spiritual experiences together. May your wise counsels protect and guide us to prosperity. 1

May we become opulent and strong through your grace and favour. Please injure us not to be exposed to the attack of adversaries. May we feel safe and secure with your manifold wondrous assistance. 2

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥३॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥४॥
इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥५॥

imá u tvā purūvaso gíro vardhantu yā́ máma pāvakávarṇāḥ śúcayo vipaścíto 'bhí stómair anūshata || 3 || ayám̐ sahásram ṛíshibhiḥ sáhaskṛitaḥ samudrá iva paprathe | satyáḥ só asya mahimā́ gṛiṇe śávo yajñéshu viprarā́jye || 4 || índram íd devátātaya índram prayaty àdhvaré | índram̐ samīké vaníno havāmaha índram̐ dhánasya sātáye || 5 || 25 ||

॥२६॥ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥६॥
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥७॥

índro mahnā́ ródasī paprathac cháva índraḥ sū́ryam arocayat | índre ha víśvā bhúvanāni yemira índre suvānā́sa índavaḥ || 6 || abhí tvā pūrvápītaya índra stómebhir āyávaḥ | samīcīnā́sa ṛibhávaḥ sám asvaran rudrā́ gṛiṇanta pū́rvyam || 7 ||

O Lord of immense riches, may these songs of praise exalt you. The learned men, pure and brilliant like fire, offer hymns to you for your glorification. 3

He, with His might augmented by sages and seers, attains thousandfold fame, which becomes vast as an ocean. His true magnanimity is glorified at the solemn ceremonies and at the places where pious persons are held in esteem. 4

We invoke the resplendent Lord for paying homage to Nature's bounties and when sacred works are proceeding. We call Him amidst our struggles of life for the attainment of wisdom and prosperity. 5

The resplendent lord, by His virtue of His prowess spreads out the earth and the heaven. He renders the sun radiant. In Him are all creatures closely held; to Him alone the sweet streams of devotional prayers flow. 6

O resplendent Lord, men glorify you with hymns, so that you may cherish their noble deeds; the spiritually awakened sages, in one accord, lift up their voice to praise you first and men possessing vital energy also sing forth your praises prior to their (work). 7

अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥८॥
तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥९॥

asyéd índro vāvṛidhe vṛíshṇyam ṣávo máde sutásya víshṇavi | adyá tám asya mahimánam āyávó 'nu shṭuvanti pūrváthā || 8 || tát tvā yāmi suvíryam tád bráhma pūrvácittaye | yénā yátibhyo bhṛígave dhánc hité yéna práskaṇvam ávitha || 9 ||

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥१०॥

yénā samudrám ásṛijo mahír apás tád indra vṛíshṇi te ṣávaḥ | sadyáḥ só asya mahimá ná saṃnáṣe yáṃ kshoṇir anucakradé || 10 || 26 ||

॥२.७॥ शग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम्
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥११॥
शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम् ॥१२॥

ṣagdhí na indra yát tvā rayíṃ yámi suvíryam | ṣagdhí vájāya prathamáṃ síshāsate sagdhí stómāya pūrvya || 11 || ṣagdhí no asyá yád dha pauráṃ ávitha dhíya indra síshāsataḥ | sagdhí yáthā rúṣamaṃ ṣyávakaṃ kṛípam índra práṿaḥ svàrnaram || 12 ||

The resplendent lord augments the energy of devotees when the exhilaration of divine love pours forth through His manifestations. Men sing forth praises to His majesty today as ever. 8

I solicit you, O resplendent Lord, for such vigour and wisdom, as may be hoped for in priority to others. Verily, you grant wealth to the celebrated priests, taken from unbelievers and you give protection to the men of creative genius. 9

O resplendent Lord, with your wish-fulfilling strength, you send great waters to the ocean. It is unattainable by any one, and the whole inhabitants of the earth crave to receive it. 10

O resplendent Lord, may you grant me wealth and vigour, which I solicit from you. First of all give to Him who, aspiring to please you, offers oblation, and then O eternal Lord, bless him who glorifies you (with praises). 11

O resplendent Lord, may you grant help to the person engaged in celebrating sacred acts—just as you have been giving help to a worthy citizen. Also help us as you have been helping skilled persons, kind-hearted ones and men engaged in welfare work, and those who lead us on heavenly path. 12

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१३॥
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥१४॥

kán návyo atasī́nāṃ turó grinīta mártyaḥ | nahí nv àsya mahimā́nam indriyám̐ svàr griṇánta ānaśúḥ || 13 ||. kád u stuvánta ṛitayanta devátā ṛ́ishiḥ kó vípra ohate | kadā́ hávam maghavann indra sunvatáḥ kád u stuvatá ā́ gamaḥ || 14 ||

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१५॥

úd u tyé mádhumattamā gíra stómāsa īrate | satrājíto dhanasā́ ákshitotayo vājayánto ráthā iva || 15 || 27 ||

कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥१६॥
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥१७॥

káṇvā iva bhṛ́igavaḥ sū́ryā iva víśvam íd dhītám ānaśuḥ | índraṃ stómebhir maháyanta āyávaḥ priyámedhāso asvaran || 16 || yukshvā́ hí vṛitrahantama hárī indra parāvátaḥ | arvācīnó maghavan sómapītaya ugrá ṛishvébhir ā́ gahi || 17 ||

No zealous living mortal, with the newest of the praises, can fully glorify you. Neither those, who have been praising Him, here to fore, would attain, through their praises, the magnanimity of the Lord May you give wealth to him, who glorifies you. 13

O resplendent Lord, is there any one among your praisers, who abides by your eternal truths? Or is there any man, sage or any genius, who can fully know the ultimate truth? When would you come close to those who perform their duties and to those who glorify you? 14

These our exceedingly sweet songs, the hymns of praises, ascend to you like ever—conquering chariots laden with wealth, charged with unfailing protections intended to procure food. 15

As like the sun, and like the learned wise sages, the enlightened people keep themselves busy in composing songs of praises, and exalting the all-pervading resplendent Lord, so do the ascetic pious devotees and lovers of sacred rituals keep themselves busy in praising Lord. 16

O the destroyer of darkness and bounteous resplendent Lord, may you yoke your vital forces even from afar, and, O renowned for your fierce and prudent acts, come to us to drink the elixir of devotional love. 17

इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥१८॥
निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥१९॥
निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥२०॥

imé hí te kāravo vāvasúr dhiyā́ víprāso medhásātaye | sá tvám no maghavann indra girvano veno ná **srinudhī hávam || 18 || nír indra brihatī́bhyo vritrám dhánubhyo asphurah̩ | nír árbudasya mrígayasya māyíno níh párvatasya gā́ ājah̩ || 19 || nír agnáyo rurucur nír u sū́ryo níh sóma indriyó rasah | nír antárikshād adhamo mahā́m áhim krishé tád indra paunsyam || 20 || 28 ||**

॥२०॥

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ॥२१॥
रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम् ।
अदाद्रायो विबोधनम् ॥२२॥
यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः ।
अस्तं वयो न तुग्र्यम् ॥२३॥
आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम् ।
तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् ॥२४॥

yám me dúr índro marútah̩ **pákasthāmā kaúrayāṇah̩ | vísveshām̩ tmánā sóbhishtham úpeva diví dhávamānam || 21 || róhitam me pákasthāmā sudhúram̩ kakshyaprā́m | ádād rāyó vibódhanam || 22 || yásmā anyé dása práti dhúram̩ váhanti váhnayah | ástam̩ váyo ná túgryam || 23 || ātmā́ pitús tanū́r vā́sa ojodā́ abhyáñjanam | turī́yam íd róhitasya pákasthāmānam bhojám̩ dātā́ram abravam || 24 || 29 ||**

O resplendent Lord, these active and wise devotees glorify you with praises for the purpose of accomplishing their pious deeds. O Lord of riches, please hear our invocations like a lover. 18

O resplendent Lord, you destroy the most wicked, even coming from far off lofty regions. As such, you snatch away from hidings in caves of hills the riches and cattle of unjust, cruel, crooked and obstinate people. 19

O resplendent Lord, of what wonder is your great act when you repel deep darkness from the mid-region; thereafter the luminaries and the sun shine brighter and the divine love then seems sweeter. Men must pay homage to your valorous manly deeds. 20

The wealth given by the resplendent Lord and by the vital elements to me—the soul, traversing and yet stationary—, is very magnificient like the quick-moving sun in the sky. 21

The resplendent self, stationed in the body, grants the vigorous steed, the mind,—the handsome and firm pole of body, which is rich in knowledge and is strong; He furnishes me with intellect capable of discriminating good from bad. 22

As several strong coursers harnessed to the chariot of a powerful king carry him to his dwelling place, in the same manner, may mind yoked to ten senses lead me to my destination. 23

It is the self of the father that is carried as if to the son's body, the sustainer of strength, purifier, from all the sides, the destroyer of inimical vices, the donor of the tawny (horses), the enjoyer of fruits; I honour such an accomplished man of restraint and action 24

(४) चतुर्थं सूक्तम्

(१-२१) एकविंशत्यृचस्यास्य सूक्तस्य काण्वो देवातिथिर्ऋषिः । (१-१४) प्रथमादिचतुर्दशर्चामिन्द्रः, (१५-१८) पञ्चदश्यादिचतसृणामिन्द्रः पूषा वा, (१९-२१) एकोनविंश्यादितृचस्य च कुरुङ्गस्य दानस्तुतिर्देवताः । (१-२०) प्रथमादिविंशत्यृचां प्रगाथः (विषमर्चां बृहती, समर्चां सतोबृहती), (२१) एकविंश्याश्च पुर उष्णिक् छन्दसी ॥

॥३०॥ यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥
यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥२॥

Yád indra prā́g apā́g údaṅ nyàg vā hūyáse nṛ́bhiḥ |
síma purū́ nṛ́shūto asy ā́navé 'si praśardha turváśe || 1 ||
yád vā rúme rúśame śyā́vake kṛ́pa índra mādáyase sácā |
káṇvāsas tvā bráhmabhi stomavāhasa índrā́ yachanty ā́ gahi || 2 ||

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥३॥
मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥४॥
प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यहो नि वृक्षा इव येमिरे ॥५॥

yáthā gauró apā́ kṛitáṃ tṛ́shyann éty ávériṇam |
āpitvé naḥ prapitvé tū́yam ā́ gahi káṇveshu sú sácā píba || 3 || mándantu tvā maghavann indréndavo rādhodéyāya sunvaté | āmúshyā sómam apibaś camū́ sutáṃ jyéshṭhaṃ tád dadhishe sáhaḥ || 4 || prá cakre sáhasā sáho babháñja manyúm ójasā | víśve ta indra pṛitanāyávo yaho ní vṛikshā́ iva yemire || 5 || ३० ||

O resplendent Lord, in whichever quarter you may be dwelling, whether in the east, west, north or south, men invoke you to come for their well-being. O destroyer of evils, O excellent, may you readily come, when invoked, to them who follow you and possess vigour. 1

O glorious Lord, all men—timid, or skilled, vicious or kind-hearted—joyfully invoke you. The wise devotees have been awaiting your arrival with prayer and dedication, to be offered to you. Would you come soon? 2

Come soon at the morning and also in the evening with the fleetness of a thirsty wild deer running to the desert's pool full of water and partake of your share of the divine love in the midst of the learned. 3

O bounteous resplendent Lord, may our sweet devotional love gladden you, so that those who are seekers would be blessed with wealth and prosperity. May you accept our love and with your surpassing might help us to win over adversities. 4

With enormous might, He casts off obstructions and with His valour, destroys their insolence. Those who seek to disobey you, and are hostile, are bowed down like withered trees. 5

॥२१॥ सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥६॥
मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥७॥
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥८॥

sahásreṇeva sacate yavīyúdhā yás ta ánaḷ úpastutim putrám prāvargáṃ kriṇute suvírye dāṣnóti námaüktibhiḥ || 6 || má bhema má ṣramishmográsya sakhyé táva | mahát te vríshṇo abhicákshyaṃ kritám páṣyema turváṣaṃ yádum || 7 || savyám ánu sphigyàṃ vāvase vríshā ná dānó asya roshati | mádhvā sáṃpriktaḥ sāraghéṇa dhenávas túyam éhi drávā píba || 8 ||

अश्वी रथी सुरूप इद्गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥९॥
ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥१०॥
॥२२॥ अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥११॥

aṣví rathí surūpá íd gómāṅ íd indra te sákhā | ṣvātrabhájā váyasā sacate sádā candró yāti sabhám úpa || 9 || ríṣyo ná tríshyann avapánam á gahi píbā sómaṃ váṣāṅ ánu | nimégh amāno maghavan divé-diva ójishṭhaṃ dadhishe sáhaḥ || 10 || 31 ||

ádhvaryo drāváya tváṃ sómam índraḥ pipāsati | úpa nūnám yuyuje vríshaṇā hárī á ca jagāma vritrahá || 11 ||

He who offers you his tributes, is assured of your help, and thereon, he gets the strength of a thousand mighty men of war. And, he who praises you with all humility, makes his son pre-eminent with heroic valour. 6

Blessed with your guidance and patronage, we become fearless and are never tired of our work. Verily, O showerer, your deeds are praiseworthy. May the physically stong persons and assiduous workers emulate the same. 7

You, the showerer of blessings, are able to encompass the entire creation with a fraction of your body,—just of the left part. You are, moreover, not displeased, with a small gift. May you come and accept our love, which is as sweet as milk products blended with honey of bees. 8

O resplendent Lord, he who is friendly with you, gets rich in chariots, horses and kine. Fully, illuminated like moon, and accompanied with wealth and food, he always goes to attend conferences of the learned. 9

May you come to the sacred works performed by us, as a thirsty deer hurrying up to the river and drink our divine love to your entire satisfaction. O bounteous Lord, everyday you shower happiness over your devotees and thus sustain your glory. 10

O priest, let the devotional love flow forth, for the Lord loves to enjoy it. Lo, the destroyer of the foes comes seated in a chariot. 11

स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥१२॥
रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन ।
अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥१३॥
उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः ।
अर्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥१४॥

svayáṃ cit sá manyate daṣurir jáno yátrā sómasya trimpási | idáṃ te ánnaṃ yújyaṃ sámukshitaṃ tásyéhi prá dravā píba || 12 || ratheshṭhā́yādhvaryavaḥ sómam índrāya sotana | ádhi bradhnásyádrayo ví cakshate sunvánto daṣvā́dhvaram || 13 || úpa bradhnáṃ vāvā́tā vríshaṇā hárī índram apásu vakshataḥ | arvā́ñcaṃ tvā sáptayo 'dhvaraṣríyo váhantu sávanéd úpa || 14 ||

प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।
स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥१५॥

prá pūshánaṃ vriṇīmahe yújyāya purūvásum | sá ṣakra ṣiksha puruhūta no dhiyá túje rāyé vimocana || 15 || 32 ||

॥३३॥ सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।
त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यम् ॥१६॥

sáṃ naḥ ṣiṣīhi bhuríjor iva kshuráṃ rasva rāyó vimocana | tvé tán naḥ suvédam usríyam vásu yáṃ tváṃ hinóshi mártyam || 16 ||

The man who offers to his lord the oblation of devotion to the satisfaction possesses of himself understanding. O Lord, here is your appropriate elixir; come, hasten and enjoy it. 12

O the chanters of devotional hymns, offer imploring prayers, with zeal to the mighty Lord, seated in the chariot of the swift-moving universe. The powerful grinding stones, placed on their bases, are effusing out the divine sap of spirituality for the cosmic sacrificial act. 13

May His vigorous horses, traversing the firmament, and fulfilling our desires, fetch the resplendent Lord to the site of our sacred works. May the fast moving steeds go and bring Him here quickly to our ceremonials. 14

We sing exceedingly sweet devotional songs to the nourishing Lord and entreat Him for friendship. O radiant and much-invoked Lord, bless us with the discriminating intellect, so that we obtain strength to become rich and victorious. 15

Sharpen our intellect like an edge of the razor in the hands of a barber. O deliverer from pains, grant us affluence. With your blessings, may we obtain the glorious wealth which may easily be ours,the mortals. 16

वेमि त्वा पूषन्नृञ्जसे वेमि स्तोतव आघृणे ।
न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥१७॥
परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥१८॥

vémi tvā pūshann ṛiñjáse vémi stótava āghṛiṇe | ná tásya vemy áraṇam hí tád vaso stushé pajrāya sāmne || 17 || párā gávo yávasam kác cid āghṛiṇe nítyam rékṇo amartya | asmákam pūshann avitá ṣivó bhava máṅhishṭho vájasātaye || 18 ||

स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।
राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥१९॥

sthūráṃ rádhaḥ ṣatáṣvaṃ kuruṅgásya díviṣhṭishu | rājñas tveshásya subhágasya rātíshu turváṣeshv amanmahi || 19 ||

धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥२०॥
वृक्षाश्चिन्मे अभिपित्वे अरारणुः ।
गां भजन्त मेहनाश्वं भजन्त मेहना ॥२१॥

dhībhíḥ sātáni kāṇvásya vājínaḥ priyámedhair abhídyubhiḥ | shashṭíṃ sahásrānu nírmajām aje nír yūthā́ni gávām ṛíshiḥ || 20 || vṛikshā́ṣ cin me abhipitvé araraṇuḥ | gā́m bhajanta mehánāṣvam bhajanta mehánā || 21 || ३३ ||

O provider of health and strength, I know you as one who would inspire me in accomplishing my tasks. Through my prayers, O radiant Lord, I sing to your divine glory. I never care to offer praises to anybody else who is unworthy. O bestower of wealth, I beg you to grant happiness to him who praises, eulogizes and glorifies you. 17

O immortal radiant Lord, let my grazing cows feed themselves in the pastures. O provider of food, may you become our protector, benign and most liberal for granting strength and affluence. 18

We acknowledge the substantial wealth of hundreds of speedy mobile forces, a donation made to us amongst men at the holy solemnities by the extremely benevolent sovereign Lord. 19

I, the seer, have been able to assimilate the entire lore which flowed in sixty thousand brilliant channels of intellect from men of wisdom, assisted by lovers of sacred ceremonials. 20

Even the trees were joyful at my assimilation (of the divine wisdom). They, the seers, have received the intellect in plenty and vigour in plenty. 21

(५) पञ्चमं सूक्तम्

(१-३९) एकोनचत्वारिंशदृचस्यास्य सूक्तस्य काण्वो ब्रह्मातिथिर्ऋषिः । (१-३६, ३७) प्रथमादिषट्त्रिंशदृचां सप्तत्रिंश्याः पूर्वार्धस्य चाश्विनौ, (३७, ३८-३९) सप्तत्रिंश्या उत्तरार्धस्याष्टात्रिंश्येकोनचत्वारिंश्योश्च चैद्यस्य कशोर्दानस्तुतिर्देवताः । (१-३६) प्रथमादिषट्त्रिंशदृचां गायत्री, (३७-३८) सप्तत्रिंश्यष्टात्रिंश्योर्बृहती, (३९) एकोनचत्वारिंश्याश्चानुष्टुप् छन्दांसि ॥

॥१॥ दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् । वि भानुं विश्वधातनत् ॥१॥
नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा । सचेथे अश्विनोषसम् ॥२॥
युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत । वाचं दूतो यथोहिषे ॥३॥

5.

Dūrád ihéva yát saty áruṇápsur áśiśvitat | ví bhānúṃ viśvádhatanat || 1 || nṛivád dasra manoyújā ráthena prithupájasā | sácethe aśvinoshásam || 2 || yuvábhyāṃ vājinīvasū práti stómā adṛikshata | vácaṃ dūtó yáthohishe || 3 ||

पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू । स्तुषे कण्वासो अश्विना ॥४॥
मंहिष्ठा वाजसातमेषयन्ता शुभस्पती । गन्तारा दाशुषो गृहम् ॥५॥

puru-
priyá ṇa ūtáye purumandrá purūvásū | stushé káṇvāso aśvínā || 4 || máṅhishṭhā vājasátameshá yantā śubhás pátī | gántārā dāśúsho grihám || 5 || 1 ||

॥२॥ ता सुदेवाय दाशुषे सुमेधामवितारिणीम् । घृतैर्गव्यूतिमुक्षतम् ॥६॥

tá sudeváya dāśúshe sumedhám ávitāriṇīm | ghṛitaír gávyūtim ukshatam || 6 ||

5

When lovely dawn, far away in the east, and yet still close by, glows over the world, she starts spreading the light all over. 1

The charming twin-divines move, like leaders, in their intently yoked far-shining chariots to accompany the divine dawn. 2

O mighty and affluent, on your way, may you both severally listen to the hymns, which I convey to you like a messenger. 3

We, the learned ones, praise the twin-divines, dear to all, making many glad and abounding in wealth for our protection. 4

(We praise) the twin lords of splendour, the bestowers of strength, providers of food, lords of opulence, and the blessing-givers to the houses of liberal worshippers. 5

May you, the twin-divines, endow the unfailing intellect on the liberal and pious devout, and sprinkle his pasturage with water. 6

आ नः स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः । यातमश्वेभिरश्विना ॥७॥
येभिस्तिस्रः परावतो दिवो विश्वानि रोचना । त्रीँरक्तून्परिदीयथः ॥८॥
उत नो गोमतीरिष उत सातीरहर्विदा । वि पथः सातये सितम् ॥९॥
आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् । वोळ्हमश्वावतीरिषः ॥१०॥

á na stómam úpa drāvát tū́yam syenébhir āsúbhih | yātám ásvebhir asvinā || 7 || yébhis tisráh parāváto divó vísvāni rocanā́ | trī́ṅr aktū́n paridíyathah || 8 || utá no gómatīr ísha utá sātír aharvidā | ví patháh sātáye sitam || 9 || á no gómantam asvinā suvíram suráthaṃ rayím | volhám ásvāvatīr íshah || 10 || 2 ||

॥३॥ वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी । पिबतं सोम्यं मधु ॥११॥
अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः । छर्दिर्यन्तमदाभ्यम् ॥१२॥
नि षु ब्रह्म जनानां याविष्टं तूयमा गतम् । मो ष्वन्याँ उपारतम् ॥१३॥
अस्य पिबतमश्विना युवं मदस्य चारुणः । मध्वो रातस्य धिष्ण्या ॥१४॥
अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् । पुरुक्षुं विश्वधायसम् ॥१५॥

vāvṛidhānā́ subhas patī dásrā híraṇyavartanī | píbatam somyám mádhu || 11 || asmábhyam vājinīvasū maghávadbhyas ca sapráthah | chardír yantam ádābhyam || 12 || ní shú bráhma jánānām yávishṭam tū́yam á gatam | mó shv ànyā́ṅ úpāratam || 13 || asyá pibatam asvinā yuvám mádasya cā́ruṇah | mádhvo rātásya dhishṇyā || 14 || asmé á vahatam rayím satávantam sahasríṇam | purukshúm visvádhāyasam || 15 || 3 ||

O twin-divines, come soon to our adoration in your speedy chariot, yoked with horses swift as hawks. 7

(Come with those speedy horses) by which you traverse the wide brilliant cosmic distances in three nights and three days. 8

O finders of the day, bless us with affluence of food, cattle and wealth, and make us safe by opening the path for us. 9

O twin-divines, we seek your blessings for the procurement of riches, such as knowledge, progeny, transport, horses and food. 10

O twin-divines, lords of splendour, and charming, riding in golden chariots, please come and accept our sweet emotional tributes. 11

O Lords of ample wealth, may you provide us with wide shelter, which can never be assailed and destroyed. 12

May you come quickly downward to attend on those people who perform sacred works, and favour not them who are opposed to. 13

O twin-divines, the revered and omniscient ones, may you both accept my tribute of sweet devotional love. 14

May you bring to us, in hundreds and in thousands, the riches, which are the source of plenteous food and which sustain all. 15

४॥ पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः । वाघद्भिरश्विना गतम् ॥१६॥
जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः । युवां हवन्ते अश्विना ॥१७॥
अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः । युवाभ्यां भूत्वश्विना ॥१८॥

purutrā́ cid dhí vāṃ narā vihváyante manīshíṇaḥ | vāghádbhir aṣviná gatam || 16 || jánāso vṛiktábarhisho havíshmanto araṃkṛ́taḥ | yuvā́ṃ havante aṣvinā || 17 || asmā́kam adyá vām ayáṃ stómo vā́hishṭho ántamaḥ | yuvā́bhyām bhūtv asvinā || 18 ||

यो ह वां मधुनो दृतिराहितो रथचर्षणे । ततः पिबतमश्विना ॥१९॥
तेन नो वाजिनीवसू पश्वे तोकाय शं गवे । वहतं पीवरीरिषः ॥२०॥

yó ha vām mádhuno dṛ́tir ā́hito ratha-cárshaṇe | tátaḥ pibatam aṣvinā || 19 || téna no vājinīvasū pásve tokā́ya sám gáve | váhatam pī́varīr íshah || 20 || 4 ||

॥५॥ उत नो दिव्या इष उत सिन्धूँरहर्विदा । अप द्वारेव वर्षथः ॥२१॥

utá no divyā́ ísha utá síndhūñr aharvidā | ápa dvā́reva varshathaḥ || 21 ||

O leaders, the learned invoke you everywhere; please come to us with your speedy forces. 16

O twin divines, people with hearts free from ills and bearing oblations, and fully prepared invoke you with devotion. 17

O twin-divines, we hope that the hymns specially composed today to honour you will touch your hearts and that both of you will respond to it by arriving at your earliest. 18

O glorious divines, the leather bottle containing the elixir of loving devotion has been placed in the pathways of your chariot. Please drink it as soon as you arrive. 19

O Lords of riches, may you bring in your case the plenteous food so that we prosper in our children, our cows, and our cattle. 20

O finders of day, may you open for us the gates of the strengthening waters of heaven and flood our rivers thereby. 21

कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा । यद्वां रथो विभिष्पतात् ॥२२॥
युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये । शश्वदूतीर्दशस्यथः ॥२३॥
ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः । यद्वां वृषण्वसू हुवे ॥२४॥
यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम् । अत्रिं शिञ्जारमश्विना ॥२५॥

kadā vāṃ taugryó vidhat samudré jahitó nárā | yád vāṃ rátho víbhish pátāt || 22 || yuváṃ káṇvāya nāsatyápiriptāya harmyé | ṣáṣvad ūtír daṣasyathaḥ || 23 || tábhir á yātam ūtíbhir návyasībhiḥ suṣastíbhiḥ | yád vaṃ vṛishaṇvasū huvé || 24 || yátha cit káṇvam ávatam priyá-medham upastutám | átriṇ siñjáram aṣvinā || 25 || 5 ||

॥६॥ यथोत कृत्व्ये धनेंशुं गोष्वगस्त्यम् । यथा वाजेषु सोभरिम् ॥२६॥
एतावद्वां वृषण्वसू अतो वा भूयो अश्विना । गृणन्तः सुम्नमीमहे ॥२७॥

yáthotá kṛítvye dhánc 'ṅṣúṃ góshv agástyam | yáthā vájeshu sóbharim || 26 || etávad vāṃ vṛishaṇvasū áto vā bhúyo aṣvinā | gṛiṇántaḥ sumnám īmahe || 27 ||

रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना । आ हि स्थाथो दिविस्पृशम् ॥२८॥
हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः । उभा चक्रा हिरण्यया ॥२९॥
तेन नो वाजिनीवसू परावतश्चिदा गतम् । उपेमां सुष्टुतिं मम ॥३०॥

rátham hí-raṇyavandhuraṃ híraṇyābhīṣum aṣvinā | á hí sthátho di-vispṛíṣam || 28 || hiraṇyáyī vāṃ rábhir īshá áksho hiraṇyá-yaḥ | ubhá cakrá hiraṇyáyā || 29 || téna no vājinīvasū parā-vátaṣ cid á gatam | úpemám sushtutím máma || 30 || 6 ||

O leaders, seated in your chariot, when would the pious (person), drowned in the ocean of ignorance, express his obligations to you for your help? Only then, when your chariot descends for his help with wings of a bird. 22

O truthful ones, you help the wise men in his abode with repeated aid, when they are tormented by adversities. 23

O twins, rich in showers, please do come to us, with most recent and most excellent protections whenever we invoke you to do so. 24

O twin-divines, I beg of you to protect me as you have been protecting your wise men, the lovers of sacrifices, the co-invokers, the praise-repeating persons and the sages, free from all types of vices, and free from triple bonds. 25

Protect me as you have been protecting a poor by giving wealth, a steadfast seer by awarding intellect, and a brave patriot in battles. 26

O tiwns, rich in showers, we humbly pray for receiving happiness from you in large measures or even-more (than what you have awarded to others). 27

O twin-divines, ascend your divine sky-touching chariot with golden seats and reins of gold. 28

O twins, of gold is made the supporting shaft of your chariot, of gold is the axle, and of gold are both the wheels. 29

O mighty twin-divines, lords of ample wealth, come to us in your chariot from distant regions to accept our hymnal tributes. 30

॥७॥ आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना । इषो दासीरमर्त्या ॥३१॥
आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना । पुरुश्चन्द्रा नासत्या ॥३२॥
एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः । अच्छा स्वध्वरं जनम् ॥३३॥
रथं वामनुगायसं य इषा वर्तते सह । न चक्रमभि बाधते ॥३४॥
हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः । धीजवना नासत्या ॥३५॥

á vahethe parākā́t pūrvī́r aṣnántāv aṣvinā | ísho dā́sīr amartyā || 31 || á no dyumnaír ā́ ṣrávobhir ā́ rāyā́ yātam aṣvinā | púruṣcandrā nā́satyā || 32 || éhá vām prushitápsavo váyo vahantu parṇínaḥ | áchā svadhvarám jánam || 33 || rátham vām ánugāyasam yá ishā́ vártate sahá | ná cakrám abhí bādhate || 34 || hiraṇyáyena ráthena dravátpāṇibhir áṣvaiḥ | dhī́javanā nā́satyā || 35 || 7 ||

॥८॥ युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू । ता नः पृङ्क्तमिषा रयिम् ॥३६॥
ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥३७॥
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥३८॥
माकिरेना पथा गाद्येनेमे यन्ति चेदयः ।
अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥३९॥

yuvám mṛigám jāgṛivā́ṅsam svádatho vā vṛishaṇvasū | tá naḥ priṅktam ishā́ rayím || 36 || tá me aṣvinā sanīnā́m vidyā́tam návānām | yáthā cic caidyáḥ kaṣúḥ ṣatám úshṭrā-nā́m dádat sahásrā dáṣa gónām || 37 || yó me híraṇyasam-dṛiṣo dáṣa rā́jño ámaṅhata | adhaspadā́ íc caidyásya kṛish-ṭáyaṣ carmamnā́ abhíto jánāḥ || 38 || mā́kir enā́ pathā́ gād yéneme yánti cedáyaḥ | anyó nét sūrír óhate bhūridā́vat-taro jánaḥ || 39 || 8 ||

O immortal twin-divines, come to us from afar; taking away plenteous food from the many amongst infidels, please bring it to us. 31

O twin divines, come to us with splendour, riches and renown; shining brightly, O ever-true divines, come to us. 32

May the dappled bird-like horses bring you here with speed and may you be present at the sacred deeds performed by men of dedication. 33

You become so formidable that the wheels of your food-yielding divine chariot are not arrested by any obstructions. 34

O ever-true divines, swift as thought, mount your golden chariot and join us in the performance of benevolent deeds. 35

O twins, rich in shower, may you taste the sparkling elixir of devotion. May you associate wealth with food for us. 36

O twins, find for me, as such, my share of the latest and best gifts of a hundred camels, and ten-thousand cows received from persons rich in discrimination and discipline. 37

Born of and sustained by intellect are the ten organs of senses and actions, bright as gold, for every one else in the body complex is beneath the feet of intellect; and all those around the intellect merely wear the cuirasses of leather. 38

O twin-divines, guide me to the path, which is meant for intellectuals only—the path that could not be achieved even by most generous and prosperous persons. 39

(६) षष्ठं सूक्तम्

(१-४८) अष्टचत्वारिंशदृचस्यास्य सूक्तस्य काण्वो वत्स ऋषिः । (१-४५) प्रथमादिपञ्चचत्वारिंशदृचामिन्द्रः, (४६-४८) षट्चत्वारिंश्याद्यृचत्रयस्य च पारशव्यस्य तिरिन्दिरस्य दानस्तुतिर्देवता । गायत्री छन्दः ॥

॥९॥ महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे ॥१॥
प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः । विप्रा ऋतस्य वाहसा ॥२॥
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् ॥३॥
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥४॥
ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥५॥

6.

Mahā́ñ índro yá ójasā parjányo vṛishṭimā́ñ iva | stómair vatsásya vāvṛidhe || 1 || prajā́m ṛitásya pípratah prá yád bháranta váhnayaḥ | víprā ṛitásya váhasā || 2 || káṇvā índram yád ákrata stómair yajñásya sā́dhanam | jāmí bruvata ā́yudham || 3 || sám asya manyáve víṣo víṣvā namanta kṛishṭáyaḥ | samudrā́yeva síndhavaḥ || 4 || ójas tád asya titvisha ubhé yád samávartayat | índraṣ cármeva ródasī || 5 || ९ ||

॥१०॥ वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा । शिरो बिभेद वृष्णिना ॥६॥
इमा अभि प्र णोनुमो विपामग्रेषु धीतयः । अग्नेः शोचिर्न दिद्युतः ॥७॥
गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः । कण्वा ऋतस्य धारया ॥८॥

ví cid vṛitrásya dódhato vájreṇa ṣatáparvaṇā | ṣíro bibheda vṛishṇínā || 6 || imā́ abhí prá ṇonumo vipā́m ágreshu dhītáyaḥ | agnéḥ ṣocír ná didyútaḥ || 7 || gúhā satír úpa tmánā prá yác chócanta dhītáyaḥ | káṇvā ṛitásya dhā́rayā || 8 ||

6

The Lord resplendent is glorified by His dear ones through hymns. He is great in his might like a charged cloud rich in rain. 1

The divine bearers (i.e. natural forces) sustain the creation born of eternal order and infuse it through and through with life. The sages also abide by this eternal order. 2

When wise men, through their laudations, have come to realize the full sense of the cosmic sacrifice of the resplendent Lord, then they need not use any other weapon. 3

Just as the rivers flow towards an ocean, similarly all people, all men, bow down before His strict discipline. 4

This power of His omnipotence shines forth brightly when the Lord of resplendence folds and unfolds celestial and terrestrial regions like the rolling and unrolling of a skin coat. 5

He severs the head of the turbulent demon of evil with His mighty hundred-knotted bolt of justice. 6

The hymns that we chant repeatedly in His praise in the company of worshippers are illuminative like a blaze of fire. 7

When our thoughts, hidden in the deep valley of our hearts, spontaneously come out, they glow, and with the stream of eternal truth, the learned sages shine. 8

प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् । प्र ब्रह्म पूर्वचित्तये ॥९॥
अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ । अहं सूर्य इवाजनि ॥१०॥

prá tám indra naṣīmahi rayíṃ gómantam aṣvínam | prá bráhma pūrvácittaye || 9 || ahám íd dhí pitúsh pári medhám ṛitásya jagrábha | aháṃ sűrya ivajani || 10 || 10 ||

११॥ अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद्दधे ॥११॥
ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः । ममेद्वर्धस्व सुष्टुतः ॥१२॥
यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् ॥१३॥

ahám pratnéna mánmanā gíraḥ ṣumbhāmi kaṇvavát | yéndraḥ ṣúshmam íd dadhé || 11 || yé tvám indra ná tushṭuvúr ṛíshayo yé ca tushṭuvúḥ | mámé́d vardhasva súshṭutaḥ || 12 || yád asya manyúr ádhvanīd ví vṛitrám parvaṣó ruján | apáḥ samudrám airayat || 13 ||

नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि । वृषा ह्युग्र शृण्विषे ॥१४॥
न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विव्यचन्त भूमयः ॥१५॥

ni ṣúshṇa in- dra dharṇasíṃ vájraṃ jaghantha dásyavi | vṛíshā hy ùgra ṣriṇvishé || 14 || ná dyáva índram ójasā nántárikshāṇi vajríṇam | ná vivyacanta bhúmayaḥ || 15 || 11 ||

O Lord of resplendence, may we obtain that wealth in wisdom, vigour and food as is necessary for the fulfilment of our life. 9

I have verily acquired the deep knowledge of the eternal truth, from my Supreme Father. I am born with the glory of the sun as if. 10

Pursuing the path of the past, and following the wise sages, I compose excellent verses to the pleasure of the resplendent Lord. 11

O resplendent Lord, there are some who do not offer prayers to you and also are those seers who are devoted to you. May your glory be augmented through my praises. 12

When His wrath is expressed through His thunder and He destroys the demon of evil thoroughly limb by limb, the stream of pure thoughts is driven towards the ocean of wisdom. 13

O Lord of resplendence, those thiefs and robbers who are groping in darkness of evils eventually invite your bolt of justice. O fierce one, you are widely famed as a showerer of benefits. 14

Neither the heavens, nor firmament, nor the regions of earth can challenge the omnipotent Lord of resplendence, who is armed with adamantine will-power. 15

॥१२॥ यस्ते इन्द्र महीरपः स्तभूयमान आशयत । नि तं पद्यासु शिश्नथः ॥१६॥
य इमे रोदसी मही समीची समजग्रभीत् । तमोभिरिन्द्र तं गुहः ॥१७॥
य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवम् ॥१८॥
इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥१९॥
या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् ॥२०॥

yás ta indra mahír apá stabhūyámāna áṣayat | ní tám pádyāsu ṣiṣṇathaḥ || 16 || yá imé ródasī mahí samīcí samájagrabhīt | támobhir indra tám guhaḥ || 17 || yá indra yátayas tvā bhṛígavo yé ca tushṭuvúḥ | mámél ugra ṣrudhī hávam || 18 || imás ta indra pṛíṣnayo ghṛitám duhata āṣíram | enám ṛitásya pipyúshīḥ || 19 || yá indra prasvàs tvāsá gárbham ácakriran | pári dhármeva sűryam || 20 || 12 ||

॥१३॥ त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इन्दवः ॥२१॥
तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितन्तसाय्यः ॥२२॥

tvā́m íc chavasas pate káṇvā ukthéna vāvṛidhuḥ | tvā́ṃ sutā́sa índavaḥ || 21 || távéd indra práṇītishūtá práṣastir adrivaḥ | yajñó vitantasáyyaḥ || 22 ||

आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम् । उत प्रजां सुवीर्यम् ॥२३॥
उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा । अग्रे विक्षु प्रदीदयत् ॥२४॥

ā́ na indra mahím ísham púraṃ ná darshi gómatīm | utá prajā́ṃ suvíryam || 23 || utá tyád āṣváṣvyaṃ yád indra náhushīshv ā́ | ágre vikshú pradídayat || 24 ||

O resplendent Lord, you crush down and smite under the rushing streams the one who, through his own footstep, obstructs the flow of free thoughts. 16

O resplendent Lord, you hide deep in darkness that evil power which seizes upon the spacious and aggregated heaven and earth. 17

O resplendent Lord, amidst the pious seekers and the celebrated enlightened sages, who offer their homage to you, O fierce one, listen to my invocations also. 18

O Lord of resplendence, these spotted cows of yours, the nourishers of sarcrifice, furnish butter, as well as a mixture of milk and curd. 19

O resplendent Lord, the earth, like prolific cattle, becomes pregnant by accepting the life-germ of rain water through its mouth. The sun thus becomes the sustainer of all. 20

O Lord of unlimited might, with hymns of praise the intellectuals augment your glory. The delightful songs of devotion, verily, enhance your renown. 21

O Lord of resplendence, due to your good guidance, you are adored by us. O master of adamantine will-power, the cosmic sacrifice of yours has been laid widely extensive. 22

O resplendent Lord, bestow upon us ample food, habitation, wealth of wisdom, handsome progeny, and vigour. 23

And O resplendent Lord, give us speedy steeds which you have been giving to our deserving people earlier. 24

अभि व्रजं न तत्निषे सूर उपाकचक्षसम् । यदिन्द्र मृळयासि नः ॥२५॥

abhí vrajáṃ ná tatnishe sū́ra upā-
káćakshasam | yád indra mriḷáyāsi naḥ || 25 || 13 ||

॥१४॥ यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः । महाँ अपार ओजसा ॥२६॥
तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये । उरुज्रयसमिन्दुभिः ॥२७॥
उपह्वरे गिरीणां संगथे च नदीनाम् । धिया विप्रो अजायत ॥२८॥
अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति । यतो विपान एजति ॥२९॥
आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् । परो यदिध्यते दिवा ॥३०॥

yád angá tavishīyása índra prarā́jasi kshitīḥ | mahā́n̐ apārá ójasā || 26 || táṃ tvā havíshmatīr víṣa úpa bruvata ūtáye | urujráyasam índubhiḥ || 27 || upahvaré girīṇā́ṃ saṃgathé ca nadī́nām | dhiyá vípro ajāyata || 28 || átaḥ samudrám udvátaṣ cikitvā́n̐ áva paṣyati | yáto vipāná éjati || 29 || ā́d ít pratnásya rétaso jyótish paṣyanti vāsarám | paró yád idhyáte divá || 30 || 14 ||

॥१५॥ कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम् । उतो शविष्ठ वृष्ण्यम् ॥३१॥
इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव । उत प्र वर्धया मतिम् ॥३२॥
उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः । विप्रा अतक्ष्म जीवसे ॥३३॥
अभि कण्वा अनूषतापो न प्रवता यतीः । इन्द्रं वनन्वती मतिः ॥३४॥

káṇvāsa indra te matíṃ víṣve vardhanti paúṅsyam | utó ṣavishṭha vṛíshṇyam || 31 || imā́m ma indra sushṭutíṃ jushásva prá sú mā́m ava | utá prá vardhayā matím || 32 || utá brahmaṇyá vayáṃ túbhyam pravṛiddha vajrivaḥ | víprā atakshma jīváse || 33 || abhí káṇvā anúshatápo ná praváta yatīḥ | índram vánanvatī matíḥ || 34 ||

O sagacious resplendent Lord, kind as you are to us, please spread our cattle over the adjacent pastures. 25

O dear Lord of resplendence, when you put forth your power, you govern us like your subjects. You are full of valour which is unlimited in strength. 26

The devoted people invoke you, the pervader of space, with heavenly offerings for protection. 27

The all-wise Lord manifests Himself to them who pray in the valleys of mountains and at the confluence of streams. 28

From His lofty place, in which pervading He abides, He, the intelligent, looks downward upon the midspace. 29

Then, verily, they see the refulgence of primeval seed, kindled on yonder side of heaven. 30

O mighty Lord, the learned people praise your wisdom and your manly power and O the mightiest, they speak highly of your heroic power in various ways. 31

O resplendent Lord, kindly pay heed to my prayers and bless me with righteous knowledge; also protect me from evils and enlighten my intellect. 32

O the possessor of adamantine will-power, O the immortal, we, the enlightened ones, through affection, offer these prayers, so that we may live long. 33

The wise men offer praises and like the stream rushing down a slope in its course, the thoughts spontaneously seek the resplendent Lord. 34

इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः। अनुत्तमन्युमजरम् ॥३५॥

índram ukthā́ni vā-
vṛidhuḥ samudrám iva síndhavaḥ | ánuttamanyum ajáram
|| 35 || 15 ||

॥१६॥ आ नो याहि परावतो हरिभ्यां हर्यताभ्याम्। इममिन्द्र सुतं पिब ॥३६॥
त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः। हवन्ते वाजसातये ॥३७॥
अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम्। अनु सुवानास इन्दवः ॥३८॥
मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति। मत्स्वा विवस्वतो मती ॥३९॥
वावृधान उप द्यवि वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः ॥४०॥

ā́ no yāhi parāváto háribhyāṃ haryatā́bhyām | imám
indra sutám piba || 36 || tvā́m íd vṛitrahantama jánāso vṛik-
tábarhishaḥ | hávante vā́jasātaye || 37 || ánu tvā ródasī
ubhé cakráṃ ná varty étaṣam | ánu suvānā́sa índavaḥ || 38 ||
mándasvā sú svàrṇara uténdra ṣaryaṇā́vati | mátsvā víva-
svato matī́ || 39 || vāvṛidhāná úpa dyávi vṛíshā vajry àroravīt |
vṛitrahā́ somapā́tamaḥ || 40 || 16 ||

॥१७॥ ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा। इन्द्र चोष्कूयसे वसु ॥४१॥
अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः। शतं वहन्तु हरयः ॥४२॥

ṛíshir hí pūrvajā́ ásy éka ī́ṣāna ójasā | índra coshkū-
yáse vásu || 41 || asmā́kaṃ tvā sutā́n úpa vītápṛishṭhā abhí
práyaḥ | ṣatáṃ vahantu hárayaḥ || 42 ||

As rivers add to the vastness of an ocean, similarly these hymns add to the glory of immortal Lord of resplendence whose wrath cannot be resisted. 35

O Lord of resplendence, come with your lovely vital energies; come to us from afar and accept our devotional love. 36

The wiṣe men who have trimmed the blades of all their impurities invoke the destroyer of the demon of evils to obtain the wealth of wisdom. 37

Like a chariot wheel, which rotates and follows the horse, heaven and earth rotate and follow you; all our tender emotions of devotion move around you. 38

Rejoice, O resplendent Lord, in the chamber of bliss; rejoice in the chamber of enlightenment; may you rejoice at the praise offered by your dedicated sacrificer. 39

He, the possessor of adamantine will-power, the destroyer of ignorance and showerer of blessings, enhancing in majesty, roars quite close in the chamber of enlightenment. 40

O Lord of resplendence, you are the supreme seer, the eternally existing one. You alone are the sovereign ruler by your valour, and the guardian of our wealth. 41

May your hundreds of units of vital energies, with splendrous forms, bring you hither to bless our noble deeds, and to our sustenance. 42

इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् । कण्वा उक्थेन वावृधुः ॥४३॥
इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः । इन्द्रं सनिष्युरूतये ॥४४॥
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥४५॥

imáṃ sú pūrvyáṃ dhíyaṃ mádhor ghṛitásya pipyúshīm | káṇvā ukthéna vāvṛidhuḥ || 43 || índram íd vímahīnām médhe vṛiṇīta mártyaḥ | índraṃ sanishyúr ūtáye || 44 || arvā́ñcaṃ tvā purushṭuta priyámedhastutā hárī | somapéyāya vakshataḥ || 45 ||

शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे । राधांसि याद्वानाम् ॥४६॥
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् । ददुष्पज्राय साम्ने ॥४७॥
उदानट्ककुहो दिवमुष्ट्रांश्चतुर्युजो ददत् । श्रवसा याद्वं जनम् ॥४८॥

ṣatám ahám tiríndire sahásram párṣāv ā́ dade | rā́dhāṅsi yā́dvānām || 46 || trī́ṇi ṣatā́ny árvatāṃ sahásrā dáṣa gónām | dadúsh pajrā́ya ṣā́mne || 47 || úd ānaṭ kakuhó dívam úshṭrāñ caturyújo dádat | ṣrávasā yā́dvaṃ jánam || 48 || 17 ||

(७) सप्तमं सूक्तम्

(१-३६) षट्त्रिंशदृचस्यास्य सूक्तस्य काण्वः पुनर्वत्स ऋषिः । मरुतो देवताः । गायत्री छन्दः ॥

॥१८॥ प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥१॥

7.

Prá yád vas trishṭúbham ísham máruto vípro áksharat | ví párvateshu rājatha || 1 ||

The veteran scholars magnify your glory with their such sacred ancient prayers that brighten the prospects of getting sweet waters. 43

Let all the mortals choose the resplendent Lord amid other powerful divine powers. Only He would protect if invoked with faith with a desire to possess wealth. 44

O Lord, invoked by all, your pair of vital powers, physical and spiritual, when appreciated by kind-hearted worshippers, will surely bring you here to cherish our noble devotions. 45

I have accepted hundreds and thousands of riches of men from my Lord to be distributed to enlightened and liberal persons. 46

Our Lord has presented ten thousand cattle and three hundred studs to the assiduous chanters of the Sāman hymns. 47

The exalted devotee reaches in fame the heights of heaven, and from the Lord, he receives camels laden with four loads gold and is assisted by immense labour for work. 48

7.

O vital winds, when the wise priest pours forth offerings of three types of food (milk, barley and herbs), as your oblation, you shine amid the mountain-clouds. 1

यदुङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् । नि पर्वता अहासत ॥२॥
उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥३॥
वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् । यद्यामं यान्ति वायुभिः ॥४॥
नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे । महे शुष्माय येमिरे ॥५॥

yád aṅgá tavishīyavo yā́mam ṣubhrā ácidhvam | ní párvatā ahāsata || 2 || úd īrayanta vāyúbhir vāṣrásaḥ pṛíṣnimātaraḥ | dhukshánta pipyúshīm ísham || 3 || vápanti marúto míham prá vepayanti párvatān | yád yā́mam yā́nti vāyúbhiḥ || 4 || ní yád yā́māya vo girír ní síndhavo vídharmane | mahé súshmāya yemiré || 5 || 18 ||

१९॥ युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे । युष्मान्प्रयत्यध्वरे ॥६॥
उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥७॥
सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे । ते भानुभिर्वि तस्थिरे ॥८॥
इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥९॥
त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥१०॥
२०॥ मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥११॥

yushmā́n̐ u náktam ūtáye yushmā́n dívā havāmahe | yushmā́n prayaty àdhvaré || 6 || úd u tyé aruṇápsavaṣ citrā́ yā́mebhir īrate | vāṣrā́ ádhi shṇúnā diváḥ || 7 || srijánti raṣmím ójasā pánthām sū́ryāya yā́tave | té bhānúbhir ví tasthire || 8 || imā́m me maruto gíram imám stómam ṛibhukshaṇaḥ | imám me vanatā hávam || 9 || trī́ṇi sárāṅsi pṛíṣnayo duduhré vajríṇe mádhu | útsaṃ kávandham udríṇam | 1
máruto yád dha vo diváḥ sumnāyánto hávāmahe | ā́ tū́ ṇa úpa gantana || 11 ||

O dear bright ones, fain to show your might, you move your gigantic vehicles on your course; and then the mountain starts trembling. 2

The loud-roaring sons of midspace, the clouds upraise themselves along with winds. They pour down the streams of food. 3

When they go their way with the winds, the clouds spread the mist abroad and make mountains rock and real. 4

At your coming, the lofty mountains and deep rivers meekly surrender themselves before your mighty force. 5

We invoke you for defence during night and also during day, in the course of our benevolent ceremonies. 6

These clouds, purple-hued and wonderful, speed on their courses, over the ridges of the sky with a roar. 7

With their might, they (the vital winds) drop the loosened rein so that the sun may proceed on his path. Then they spread themselves with beams of light. 8

O wise, vital principles, may you accept my admiration, my hymn of praise, my song, and my invocation. 9

The milch-kine, as if, have filled for the Lord of punitive justice, three lakes of sweet water from the dripping water-bearing clouds. 10

O vital principles, we, who seek happiness in life, hereby invoke you from the sky; please do come to us quickly. 11

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥१२॥
आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥१३॥
अधीव यद्गिरीणां यामं शुभ्रा अचिध्वम् । सुवानैर्मन्दध्व इन्दुभिः ॥१४॥
एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः । अदाभ्यस्य मन्मभिः ॥१५॥

yūyáṃ hí shṭhā́ sudānavo rúdrā ibhukshaṇo dáme | utá prácetaso máde || 12 || ā́ no rayím madacyútam purukshúṃ viṣvádhāyasam | íyartā maruto diváḥ || 13 || ádhīva yád girīṇā́ṃ yā́maṃ ṣubhrā ácidhvam | suvānaír mandadhva índubhiḥ || 14 || etā́vataṣ cid eshāṃ sumnám bhiksheta mártyaḥ | ádābhyasya mánmabhiḥ || 15 || 20 ||

॥२१॥ ये द्रप्सा इव रोदसी धमन्त्यनु वृष्टिभिः । उत्सं दुहन्तो अक्षितम् ॥१६॥
उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः । उत्स्तोमैः पृश्निमातरः ॥१७॥
येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥१८॥
इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥१९॥
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः । ब्रह्मा को वः सपर्यति ॥२०॥
॥२२॥ नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ ऋतस्य जिन्वथ ॥२१॥

yé drapsā́ iva ródasī dhámanty ánu vṛishṭíbhiḥ | útsaṃ duhánto ákshitam || 16 || úd u svānébhir īrata úd ráthair úd u vāyúbhiḥ | út stómaiḥ pṛíṣnimātaraḥ || 17 || yénāvá turváṣaṃ yáduṃ yéna káṇvaṃ dhanaspṛítam | rāyé sú tásya dhīmahi || 18 || imā́ u vaḥ sudānavo ghṛitáṃ ná pipyúshīr íshaḥ | várdhān kāṇvásya mánmabhiḥ || 19 || kvà nūnáṃ sudānavo mádathā vṛiktabarhishaḥ | brahmā́ kó vaḥ saparyati || 20 || 21 ||

nahí shma yád dha vaḥ purā́ stómebhir vṛiktabarhishaḥ | ṣárdhāñ ṛitásya jínvatha || 21 ||

O wise and bountiful cosmic forces, staying in your universal abode, in the state of exhilaration you are fully conscious of your functions. 12

O clouds, kindly send riches from heaven, distilling rapturous joy with plentiful food to sustain all. 13

O attractive ones, over the hills you resolve to drive your car. May you rejoice in the sweet prayers we offer. 14

The mortal should beg for himself happiness with his laudations from them who have ever been invincible. 15

They, who, like fiery sparks, inflate earth and heaven with rain, milking the cloud that never fails. 16

They, the sons of midspace, march on chariots with tumultous roar, with tempest and with hymns of praise. 17

We meditate on that generosity whereby you always help the toiler, the warrior, and the wealth-seeking priest. 18

O bounteous ones, may these our viands flow in streams like holy butter; by the prayers of wise devotees, may your glory be magnified. 19

O bounteous ones, for whom is presented the trimmed grass?; at which place are you being now rejoiced?; and who is that priest that is adoring you ? 20

O, the one for whom the grass is trimmed, none can deny that you have been ever deriving strength from the sacrifice, by our praises. 21

समु त्ये महतीरपः सं क्षोणी समु सूर्यम् । सं वज्रं पर्वशो दधुः ॥२२॥
वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः । चक्राणावृष्णि पौंस्यम् ॥२३॥
अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् । अन्विन्द्रं वृत्रतूर्ये ॥२४॥
विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः । शुभ्रा व्यञ्जत श्रिये ॥२५॥

sám u tyé mahatír apaḥ sám kshoṇí sám u sū́ryam | sám vájram parvasó dadhuḥ || 22 || ví vṛitrám parvaṣó yayur ví párvatāň arājínaḥ | cakrāṇā́ vṛíshṇi paúṅsyam || 23 || ánu tritásya yúdhyataḥ ṣúshmam āvann utá krátum | ánv índram vṛitratū́rye || 24 || vidyúddhastā abhídyavaḥ ṣíprāḥ ṣīrshán hiraṇyáyīḥ | ṣubhrā́ vy àñjata ṣriyé || 25 || २२ ||

॥२३॥ उशना यत्परावत उक्ष्णो रन्ध्रमयातन । द्यौर्न चक्रदद्भिया ॥२६॥
आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः । देवास उप गन्तन ॥२७॥

uṣánā yát parāváta ukshṇó rándhram áyātana | dyaúr ná cakradad bhiyā́ || 26 || ā́ no makhásya dāváné 'ṣvair híraṇyapāṇibhiḥ | dévāsa úpa gantana || 27 ||

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥२८॥
सुषोमे शर्यणावत्यार्जीके पस्त्यावति । ययुर्निचक्रया नरः ॥२९॥

yád eshām pṛíshatī ráthe práshṭir váhati róhitaḥ | yā́nti ṣubhrā́ riṇánn apā́ḥ || 28 || sushóme ṣaryaṇā́vaty ārjīké pastyā̀vati | yayúr nícakrayā náraḥ || 29 ||

They bring together the abundant waters, and also the heaven and the earth, the sun, and even joint by joint the bolt of inflicting punishment. 22

They, manifesting the manly vigour, divide the body of the devil of evils, limb by limb, and split the gloomy mountain clouds of ignorance. 23

They vigilantly guard and reinforce the power and strength of triply-bonded (soul) and help the inner self in the struggle to win over evil of ignorance. 24

They, bright and celestial, decorate themselves, holding lightning in their hands and gloriously display gold helmets on their heads. 25

Glorified by the spirited poet, when eagerly you come from a distance to the cavern of the vast rainy firmament, there starts a roar in heaven, as if from fear. 26

O celestial Nature's bounties, with your speedy-footed and gold-decorated horses, come here to bless our benevolent acts. 27

The clouds come in their spotted or red coloured chariot with tremendous speed, and of them, the brilliant ones shed the rains. 28

Whilst the cloud-bearing winds proceed downward with chariot wheels, to the country side of warriors, the rains flow in the valley through channels, some of which have charming curve-movements, the others flow in straight streams, and some more with whirling motion. 29

कदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥३०॥

kadā́ gachātha maruta itthā́ vípram
hávamānam | mārḍīkébhir nā́dhamānam || 30 || 23 ||

॥२४॥ कद्ध नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥३१॥
सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः ॥३२॥
ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय । ववृत्यां चित्रवाजान् ॥३३॥
गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चिन्नि येमिरे ॥३४॥
आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः । धातारः स्तुवते वयः ॥३५॥
अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा । ते भानुभिर्वि तस्थिरे ॥३६॥

kád dha nūnám kadhapriyo yád índram ajahātana | ko vaḥ sakhitvá ohate || 31 || sahó shú ṇo vájrahastaiḥ káṇvāso agním marúdbhiḥ | stushé híraṇyavāṣībhiḥ || 32 || ó shú vríshṇaḥ práyajyūn á návyase suvitaya | vavṛityám citrávajān || 33 || giráyaṣ cin ní jihate párṣānāso mányamānāḥ | párvatāṣ cin ní yemire || 34 || ákshṇayavāno vahanty antárikshena pátataḥ | dhátāra stuvaté váyaḥ || 35 || agnír hí jáni pūrvyáṣ chándo ná súro arcísha | té bhānúbhir ví tasthire || 36 || 24 ||

(८) अष्टमं सूक्तम्

(१-२३) त्रयोविंशत्यृचस्यास्य सूक्तस्य काण्वः सध्वंस ऋषिः । अश्विनौ देवते । अनुष्टुप् छन्दः ॥

॥२५॥ आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥१॥

8.

Ā́ no víṣvābhir ūtíbhir áṣvinā gáchatam yuvám | dásrā híraṇyavartanī píbatam somyám mádhu || 1 ||

O vital winds, when shall you arrive with your abundant prosperity to the singer who invoke you thus? 30

O vital winds, glorified by praise, when is it that you really desert the sun ? Who is there that enjoys your friendship ? 31

The wise sages sing forth the praise of adorable Lord, whilst the cloud-bearing winds pass by, bearing thunder-bolt in their hands and armed with golden lances. 32

Hither, for the sake of obtaining prosperity I propitiate (cloud-bearing winds), the showerers, adorable and vital, the possessors of wonderful strength. 33

Before them, the oppressed and agitated clouds move from their places and even the mountains bend down. 34

Their steeds traversing on the fortuous path carry them through mid-air and provide food to the worshipper. 35

The fire-divine manifests first among Nature's bounties. He is like the brilliant sun in splendour. Thereafter, they, the vital winds, spread far and wide with their radiance. 36

8

O pair of divines, may you come to bless our benevolent acts with all your protective measures. O marvellous ones, may you come traversing on golden paths to share our sweet elixir of devotion. 1

आ नूनं यातमश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥२॥
आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥३॥
आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥४॥
आ नो यातमुपश्रुत्यश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥५॥

á nūnám yātam aṣvinā ráthena sū́ryatvacā | bhújī híraṇyapeṣasā kávī gámbhīracetasā || 2 || ā́ yātam náhushas páry ā́ntárikshat suvṛiktíbhiḥ | píbātho aṣvinā mádhu káṇvānām sávane sutám || 3 || ā́ no yātam divás páry ā́ntárikshād adhapriyā | putráḥ káṇvasya vām ihá sushā́va somyám mádhu || 4 || ā́ no yātam úpaṣruty áṣvinā sómapītaye | sváhā stómasya vardhanā prá kavī dhītíbhir narā || 5 || 25 ||

॥२६॥

यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥६॥
दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥७॥
किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना ।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥८॥

yác cid dhí vām purá ṛ́shayo juhūré 'vase narā | ā́ yātam aṣvinā́ gatam úpemām sushṭutím máma || 6 || diváṣ cid rocanā́d ádhy ā́ no gantam svarvidā | dhībhír vatsapracetasā stómebhir havanaṣrutā || 7 || kím anyé páry āsate 'smát stómebhir aṣvínā | putráḥ káṇvasya vām ṛ́shir gīrbhír vatsó avīvṛidhat || 8 ||

O bounteous, sagacious twin-divines, may you come with your golden forms, riding on the cosmic chariots, decked with a sun-bright canopy. 2

O twin-divines, attracted by the sweet hymns come from celestial and mid-air region and accept our divine love expressed by enlightened devotees at the sacrifice. 3

As we intensely love you, come to us here from the highest celestial regions; come from the mid-region. Here the son of the pious priest is constantly pouring forth his devotional love to you. 4

Come, O twin-divines, to give ear to us and to cherish our divine love. Come speedily, O inspirers of devotional prayers; come, O wise leading powers, with your benevolent intentions. 5

O leaders of rites, the twin-divines, today as ever the seers invoke you for their protection; so now, come to us, come near to hear my praises. 6

O hearers to our invocations, observants to our inner conscience, come to us through our prayers, O the one kind to devotee, from the luminous sphere of heaven. 7

Do others more than we adore the twin-divines with their hymns of praise? The seer-son of pious priest magnifies you with his songs. 8

आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना ।
अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥९॥
आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥१०॥

á vāṃ vípra ihávasé 'hvat stómebhir aṣvinā | áriprā vṛ́trahantamā tā́ no bhūtam mayobhúvā || 9 || a yad vām yóshaṇā rátham átishṭhad vājinīvasū | víṣvāny asvinā yuvám prá dhītā́ny agachatam || 10 || 26 ||

॥२७॥

अतः सहस्रनिर्णिजा रथेना यातमश्विना ।
वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥११॥
पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥१२॥
आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥१३॥
यन्नासत्या परावति यद्वा स्थो अध्यम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥१४॥
यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥१५॥

átaḥ sahásranirṇijā ráthená yātam aṣvinā | vatsó vām mádhumad vácó 'ṣaṅsīt kāvyáḥ kavíḥ || 11 || purumandrá puruvásū manotárā rayīṇā́m | stómam me aṣvínāv imám abhí váhnī anūshātām || 12 || ā́ no víṣvāny aṣvinā dhattáṃ rádhāṅsy áhrayā | kṛitáṃ na ṛitvíyāvato má no rīradhataṃ nidé || 13 || yán nāsatyā parāváti yád vā sthó ádhy ámbare | átaḥ sahásranirṇijā ráthená yātam aṣvinā || 14 || yó vaṃ nasatyāv ṛíshir gīrbhír vatsó ávīvṛidhat | tásmai sahásranirṇijam ísham dhattaṃ ghṛitaṣcútam || 15 || 27 ||

O twin-divines, free from sin, the destroyer of evils, the pious devotee invokes you with his hymns; may you bless him for peace and prosperity. 9

O twin-divines, lords of wealth and wisdom, when the maiden dawn mounts on your cosmic chariot, you feel, as if you have attained all wishes that you cherish. 10

Come, therefore, O twin-divines, on your chariot that is decked with a thousand ornaments. The lovable sage, the poet, has been chanting sweet melodious songs to you. 11

O twin-divines, bestowers of happiness to all, lords of ample wealth, discoverers of opulence, bearers of blessings, may you respond well to my devotional prayer. 12

O twin-divines, grant us all rich gifts wherewith no man may interfere. Make us observer of eternal laws. Submit us not to the reviler. 13

O ever-true twin-divines, whether you be near or far away, come from there on your cosmic chariot that is decked with a thousand ornaments. 14

O ever-true twin-divines, the lovable sage has been glorifying you with his praises; may you grant him rich nourishment, furnished with butter and graced with a thousand ornaments. 15

॥२८॥

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥१६॥
आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥१७॥
आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥१८॥
आ नो गन्तं मयोभुवाश्विना शंभुवा युवम् ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥१९॥
याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥

prásmā ū́rjaṃ ghṛitaścútam áṣvinā yáchataṃ yuvám | yó vāṃ sumnáya tushṭávad vasūyád dánunas patī || 16 || ā́ no gantaṃ riṣādasemáṃ stómam purubhujā | kṛitáṃ naḥ susríyo naremá datam abhíshṭaye || 17 || ā́ vāṃ víṣvābhir ūtíbhiḥ priyámedhā ahushata | rájantāv adhvarāṇām áṣvinā yámahutishu || 18 || ā́ no gantam mayobhúváṣvinā ṣambhúvā yuvám | yó vāṃ vipanyū dhītíbhir gīrbhír vatsó ávīvṛidhat || 19 || yábhiḥ káṇvam médhatithiṃ yábhir váṣaṃ dáṣavrajam | yábhir góṣaryam avataṃ tábhir no 'vataṃ nara || 20 || [28] ||

॥२९॥

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्वस्माँ अश्विना प्रावतं वाजसातये ॥२१॥
प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥२२॥

yábhir narā trasádasyum ávataṃ kṛ́tvye dháne | tábhiḥ shv àsmā́ñ aṣvinā právataṃ vájasātaye || 21 || prá vāṃ stómāḥ suvṛiktáyo gíro vardhantv aṣvinā | púrutrā vṛ́trahantamā tá no bhūtam, puruspṛ́hā || 22 ||

O twin-divines, lords of opulence, may you bestow strength-giving food, furnished with butter on us who invoke you for happiness and prosperity. 16

Come to respond to our praises, O cosmic leaders, dispellers of diseases, lords of rich treasures. Give us wide fame and all precious things which we desire. 17

O twin-divines, ruling over religious rites, lovers of solemn ceremonies, we have been calling you to come to us with all your protective aids. 18

O twin-divines, givers of happiness and prosperity, lovers of songs, please come to the lovable sage who adores you with prayers and dedication. 19

O leaders of cosmic sacrifice, may you come to help us with those protective measures by which you have been helping the enlightened one, and the guest at ceremonies, as well as the glorious one and the mendicant, and also have given protection to the man adept in controlling the senses. 20

O twin-divines, leaders of cosmos, you protect those who fight against law-breakers in the struggle to gain wealth. May you graciously assist us in acquiring these riches. 21

O twin-divines, protectors of many, and destroyers of evils, may our sincere praises and songs augment your glory. We fondly yearn for your favours. 22

त्रीणि प॒दान्य॒श्विनो॑रा॒विः सान्ति॒ गुहा॑ प॒रः ।
क॒वी ऋ॒तस्य॒ पत्म॑भिर॒र्वाग्जी॒वेभ्य॒स्परि॑ ॥२३॥

trī́ṇi padā́ny aṣvínor
āvíḥ sánti gúhā paráḥ | kaví ritásya pátmabhir arvā́g jī-
vébhyas pári || 23 || 29 ||

(९) नवमं सूक्तम्

(१-२१) एकविंशत्यृचस्यास्य सूक्तस्य काण्वः शशकर्ण ऋषिः । अश्विनौ देवते । (१. ४. ६. १४-१५)
प्रथमाचतुर्थीषष्ठीचतुर्दशीपञ्चदशीनामृचां बृहती. (२-३. २०-२१) द्वितीयातृतीयाविंश्येक-
विंशीनां गायत्री. (५) पञ्चम्याः ककुप् . (७-९. १३. १६-१९.) सप्तम्यादि-
तृचस्य त्रयोदश्याः षोडश्यादिचतसृणाञ्चानुष्टुप् . (१०) दशम्यास्त्रिष्टुप् .
(११) एकादश्या विराट् . (१२) द्वादश्याश्च जगती छन्दांसि ॥

॥३०॥ आ नू॒नम॑श्विना यु॒वं व॒त्सस्य॑ गन्त॒मव॑से ।
प्रास्मै॑ यच्छतमवृ॒कं पृ॒थु च्छ॒र्दिर्यु॑यु॒तं या अरा॑तयः ॥१॥
यद॒न्तरि॑क्षे॒ यद्दि॒वि यत्पञ्च॒ मानु॑षाँ॒ अनु॑ । नृ॒म्णं तद्ध॑त्तमश्विना ॥२॥
ये वां॒ दंसां॑स्यश्विना॒ विप्रा॑सः परिमामृ॒शुः । ए॒वेत्का॒ण्वस्य॑ बोधतम् ॥३॥
अ॒यं वां॑ घ॒र्मो अ॑श्विना॒ स्तोमे॑न॒ परि॑ षिच्यते ।
अ॒यं सोमो॒ मधु॑मान्वाजिनीवसू॒ येन॑ वृ॒त्रं चिके॑तथः ॥४॥
यद॒प्सु यद्वन॒स्पतौ॒ यदोष॑धीषु पुरुदंससा कृ॒तम् ।
तेन॑ माविष्टमश्विना ॥५॥

9.

Ā́ nūnám aṣvinā yuváṃ vatsásya gantam ávase | prás-
mai yachatam avṛikám pṛithú chardír yuyutáṃ yā́ árāta-
yaḥ || 1 || yád antárikshe yád diví yát páñca mā́nushā̃ ánu |
nṛimṇáṃ tád dhattam aṣvinā || 2 || yé vā[illegible] dáṅsāṅsy aṣvinā
víprāsaḥ parimāmṛiṣúḥ | evét kāṇvásya b[illegible]dhatam || 3 || ayám
vāṃ gharmó aṣvinā stómena pári shicyate | ayáṃ sómo
mádhumān vājinīvasū yéna vṛitráṃ cíketathaḥ || 4 || yád
apsú yád vánaspátau yád óshadhīshu purudaṅsasā kṛitám |
téna māvishṭam aṣvinā || 5 || 30 ||

The secret of three paces (or wheels) of the chariot of the twin-divines, so far concealed, is made apparent now. Both sagacious lords come to the living creation with their wings of eternal truth. 23

9

O twin-divines, may you come to favour your dear devotee; bestow on him a spacious and secure home and keep malignities away from him. 1

O twin-divines, may you bestow on us, on all the five types of men, the manly strength that prevails in midspace or in heaven. 2

O twin-divines, may you recall that among the devotees, the men of wisdom first of all noticed and repeatedly honoured your wondrous deeds. 3

O twin-divines, lords of ample wealth, the warm appreciation and admiration are offered to you. This is the sweet elixir of devotion through which you destroy the demon of evil. 4

O wonderful divines, whatever (healing) virtue exists in waters, in glowing plants and in herbs, therewith may you help me also. 5

॥३१॥ यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥६॥
आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥७॥

yán nāsatyā bhuraṇyátho yád vā deva bhishajyáthaḥ | ayáṃ vāṃ vatsó matíbhir ná vindhate havíshmantaṃ hí gáchathaḥ || 6 || á nūnám aṣvínor ṛíshi stómaṃ ciketa vāmáyā | á sómam mádhumattamaṃ gharmáṃ siñcād átharvaṇi || 7 ||

आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥८॥
यदद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम् ॥९॥
यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।
पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥१०॥

á nūnáṃ raghúvartaniṃ ráthaṃ tishṭhātho aṣvinā | á vāṃ stómā imé máma nábho ná cucyavīrata || 8 || yád adyá vāṃ nāsatyokthaír ācucyuvīmáhi | yád vā vāṇībhir aṣvinevét kāṇvásya bodhatam || 9 || yád vāṃ kakshívāñ utá yád vyàṣva ṛíshir yád vāṃ dīrghátamā juháva | príthī yád vāṃ vainyáḥ sádaneshv evéd áto aṣvinā cetayethām || 10 || 31 ||

O evertrue divines, whatever sustenance you provide, whatever you tend or heal, your dear devotee cannot achieve by prayers alone. May you personally pay visit to him who offers oblation. 6

The seer is now composing the song of praise for twin-divines with splendid zeal. Let the priest pour the herbal juice and warm oblation in the ritual fire. 7

O twin-divines, now ascend your cosmic chariot, that lightly rolls on its way. May these prayers bring you speedily hitherward like the sun in the heaven. 8

O evertrue divines, today we invoke you with hymns and with our songs, so that you come speedily hither. May you respond to the intelligent devotee specially. 9

O twin-divines, just as you are good enough to listen to the prayers of craftsmen, seers, the composers, persons with penetrating insight, intellectuals, and astronomers, in the same way, may you kindly respond to our prayers in this congregation. 10

॥३२॥ यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥११॥
यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥

yātáṃ cuardishpá utá naḥ paraspá bhūtáṃ jagatpá utá nas tanūpá | vartís tokáya tánayāya yātam || 11 || yád índrena sarátham yāthó asvinā yád vā vāyúnā bhávathaḥ sámokasā | yád ādityébhir ribhúbhih sajóshasā yád vā víshṇor vikrámaṇeshu tíshṭhathah || 12 ||

यदद्याश्विनावहं हुवेय वाजसातये ।
यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥१३॥
आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥१४॥

yád adyáṣvínāv ahám huvéya vájasātaye | yát pritsú turváṇe sáhas ṭác chréshṭham aṣvínor ávaḥ || 13 || á nūnáṃ yātam aṣvinemá havyáni vāṃ hitá | imé sómāso ádhi turváṣe yádāv imé káṇveshu vāṃ átha || 14 ||

यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥१५॥

yán nāsatyā parāké arvāké ásti bheshajám | téna nūnáṃ vimadáya pracetasā chardír vatsáya yachatam || 15 || 32 ||

Come to us as our home-guardian, come to us guarding against enemies, come to us guarding our animate creatures and guarding our bodies. May you come to our house to bless us with sons and grandsons. 11

O twin-divines, whether you are absorbed with the problems of the chariot of the sun or functioning along with wind, or with the vital solar rays, or standing still in the firmament, the resting place of the all-pervading Lord, (in either case you come here). 12

O twin-divines, when I call on you today, in the midst of heavy battles of life, may I feel that the graceful protection of twin-divines is very essential for winning over the enemies. 13

Now come, O twin-divines, hitherward. Here are the oblations formerly presented to you by physically powerful persons and assiduous workers and they are now being presented by intellectuals. 14

O evertrue divines of surpassing wisdom, whatever healing balm you possess, near or far away, by which you treated the body of the depressed, may you kindly grant it to the young lovable. 15

॥३३॥

अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥
प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥१७॥

ábhutsy u prá devyā́ sākáṃ vācáhám aṣvínoḥ | vy ā̀var devy ā́ matíṃ ví rātím mártyebhyaḥ || 16 || prá bodhayosho aṣvínā prá devi sūnṛite mahi | prá yajñahotar ānushák prá mádāya ṣrávo bṛihát || 17 ||

यदुषो यासि भानुना सं सूर्येण रोचसे ।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥१८॥
यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥१९॥
प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे । प्र दक्षाय प्रचेतसा ॥२०॥
यन्नूनं धीभिरश्विना पितुर्योना निषीदथः । यद्वा सुम्नेभिरुक्थ्या ॥२१॥

yád usho yā́si bhānúnā sáṃ sū́ryeṇa rocase | ā́ hāyám aṣvíno rátho vartír yāti nṛipā́yyam || 18 || yád ā́pītāso aṅṣávo gā́vo ná duhrá ū́dhabhiḥ | yád vā vā́ṇīr ánūshata prá devayánto aṣvínā || 19 || prá dyumnā́ya prá ṣávase prá nṛishā́hyāya ṣármaṇe | prá dā́kshāya pracetasā || 20 || yán nūnáṃ dhībhír aṣvinā pitúr yónā nishī́dathaḥ | yád vā sumnébhir ukthyā || 21 || 33 ||

I rise with the advent of twin-divines and scatter the goddess of darkness by eulogies. Please bestow gifts of wealth and wisdom to us, the mortals. 16

O lady dawn, the truth-speaking and mighty, awake the twin-divines; O powerful inspirer of sacred works, may you rise straightway to grant us wide fame and delight. 17

O dawn, approaching with your radiance, you shine together with the sun, and come to the cosmic chariot of twin-divines which protects the homes of men. 18

When yellow stalks of medicinal herbs milk forth their juices as cows pour milk from their udders and voices sound the song of praise, the twin-divines come first to worship. 19

O most sagacious ones, may you inspire us for glory and happiness, for skill and strength, and for victory. 20

O twin-divines, whether you are seated with our supreme Lord, the father of all, or engaged in holy rites or glorified by us, (please do come hither). 21

(१०) दशमं सूक्तम्

(१-६) षड्चस्यास्य सूक्तस्य घौरः काण्वः प्रगाथ ऋषिः । अश्विनौ देवते । (१) प्रथमर्चो बृहती
(२) द्वितीयाया मध्येज्योतिस्त्रिष्टुप् (३) तृतीयाया अनुष्टुप् (४) चतुर्थ्या आस्तारपङ्क्तिः
(५-६) पञ्चमीषष्ठ्योश्च प्रगाथः (पञ्चम्या बृहती,
षष्ठ्याः सतोबृहती) छन्दांसि ॥

॥३४॥ यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥१॥
यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतम् ।
बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥२॥
त्या न्वश्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥३॥
ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥४॥
यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥५॥
यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।
यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥६॥

10.

Yát sthó dīrgháprasadmani yád vādó rocané diváḥ | yád vā samudré ádhy ákṛite gṛihé 'ta á yātam aṣvinā || 1 || yád vā yajñám mánave sammimiksháthur evét kāṇvásya bodhatam | bṛíhaspátiṃ víṣvān deváñ ahám huva índrāvíshṇū aṣvínāv āṣúhéshasā || 2 || tyá nv aṣvínā huve sudáṅsasa gṛibhé kṛitá | yáyor ásti prá ṇaḥ sakhyáṃ devéshv ádhy ápyam || 3 || yáyor ádhi prá yajñá asūré sánti sūráyaḥ | tá yajñásyādhvarásya prácetasā svadhábhir yá píbataḥ somyám mádhu || 4 || yád adyáṣvināv ápāg yát prák sthó vājinīvasū | yád druhyávy ánavi turváṣe yádau huvé vām átha má gatam || 5 || yád antárikshe pátathaḥ purubhujā yád vemé ródasī ánu | yád vā svadhábhir adhitíshṭhatho rátham áta á yatam aṣvinā || 6 || ३४ ||

10

Whether you are in spacious halls of sacrifice, or dwell in yonder light of celestial region or in a mansion built above the firmament, from anywhere, O twin-divines, come to us. 1

Or, as you have been assisting the man from the earliest times in his sacrifice, please consent to assist the son of this intelligent person also. I invoke the preceptor and I call all the bounties, the divine sun, the divine wind and twin-divines to come rapidly to bless us. 2

I invoke those twin-divines, who work marvels, with whom our friendship is widely famed, and the kinship with Nature's bounties is well known; who come here to receive oblations. 3

On whom the solemn worship depends, whose worshippers rise before the sun rises, who forstall the holy work of worship, they alone drink the elixir of devotion on their own accord. 4

O twin-divines, lords of wealth, whether you abide today in the east or in the west; whether you sojourn with violent or nonviolent, whether with an unusually strong or with a common man, I invoke you here; come to me. 5

O twin-divines, lords of great riches, come here, whether through the firmament; or flying with speed through heaven and earth; or ascending with splendour on your cosmic chariot. 6

(११) एकादशं सूक्तम्

(१–१०) दशर्चस्यास्य सूक्तस्य काण्वो वत्स ऋषिः । अग्निर्देवता । (१) प्रथमर्चः प्रतिष्ठा गायत्री, (२) द्वितीयाया वर्धमाना गायत्री, (३–९) तृतीयादिसप्तानां गायत्री, (१०) दशम्याश्च त्रिष्टुप् छन्दांसि ॥

॥३५॥ त्वम॑ग्ने व्रत॒पा अ॑सि दे॒व आ मर्त्ये॒ष्वा । त्वं य॒ज्ञेष्वीड्यः॑ ॥१॥
त्वम॑सि प्र॒शस्यो॑ वि॒दथे॑षु सहन्त्य । अग्ने॑ र॒थीर॑ध्व॒राणा॑म् ॥२॥
स त्वम॒स्मदप॒ द्विषो॑ युयो॒धि जा॑तवेदः । अदे॑वीरग्ने॒ अरा॑तीः ॥३॥
अन्ति॑ चि॒त्सन्त॒मह॑ य॒ज्ञं मर्त॑स्य रि॒पोः । नोप॑ वेषि जातवेदः ॥४॥
मर्ता॒ अम॑र्त्यस्य ते॒ भूरि॒ नाम॑ मनामहे । विप्रा॑सो जा॒तवे॑दसः ॥५॥

11.

Tvám agne vratapá asi devá á mártyeshv á | tvám yajñéshv íḍyaḥ || 1 || tvám asi praṣásyo vidátheshu sahantya | ágne rathír adhvaráṇām || 2 || sá tvám asmád ápa dvísho yuyodhí jātavedaḥ | ádevīr agne árātīḥ || 3 || ánti cit sántam áha yajñám mártasya ripóḥ | nópa veshi jatavedaḥ || 4 || mártā ámartyasya te bhúri náma manāmahe | víprāso jātávedasaḥ || 5 || 35 ||

॥३६॥ विप्रं॒ विप्रा॒सोऽव॑से दे॒वं मर्ता॑स ऊ॒तये॑ । अ॒ग्निं गी॒र्भिर्ह॑वामहे ॥६॥
आ ते॑ व॒त्सो मनो॑ यमत्पर॒माच्चि॑त्स॒धस्था॑त् । अग्ने॒ त्वांका॑मया गि॒रा ॥७॥
पु॒रु॒त्रा हि स॒दृङ्ङसि॒ विशो॒ विश्वा॒ अनु॑ प्र॒भुः । स॒मत्सु॑ त्वा हवामहे ॥८॥
स॒मत्स्व॒ग्निमव॑से वाज॒यन्तो॑ हवामहे । वाजे॑षु चि॒त्ररा॑धसम् ॥९॥

vípram víprāsó 'vase devám mártāsa ūtáye | agním gīrbhír havāmahe || 6 || á te vatsó máno yamat paramác cit sadhásthāt | ágne tvámkāmayā girá || 7 || purutrá hí sadṛíṅṅ ási víṣo víṣvā ánu prabhúḥ | samátsu tvā havāmahe || 8 || samátsv agním ávase vajayanto havāmahe | vájeshu citrá rādhasam || 9 ||

11

O adorable, you are divine amongst the mortal men, and preserver of their sacred deeds. Therefore we worship you in every benevolent task. 1

O mighty fire-divine, you must be glorified at our all congregations. You convey our offerings to Nature's bounties. 2

O adorable Lord, cognizant of all, may you drive afar from us our foes who hate us, and fight against them and their godless enmities. 3

O all-knowing adorable Lord, may you not accept the offering of an insincere man, our adversary, however nigh to you he may pretend to be. 4

We, mortal sages, invoke you and call your name with devotion, O omniscient immortal Lord. 5

The sagacious mortals invoke divine, adorable and all-knowing Lord with sacred hymns for protection. 6

O adorable Lord, may the dear young devotee draw your kind attention through his song, yearning to meet you even at your loftiest dwelling place. 7

You are the same in many a place. You are the supreme Lord amid all the people of creation. In fray and fight, we call on you. 8

When we seek strength, we invoke adorable Lord, the giver of all sorts of gifts, to help us in the battle of life. 9

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥१०॥

pratnó hí kam íḍyo adhvaréshu sanác ca hótā návyaṣ ca sátsi | svám cagne tanvàm pipráyasvasmábhyam ca saúbhagam á yajasva || 10 || 36 ||

(१२) द्वादशं सूक्तम्

(१-३३) त्रयस्त्रिंशदृचस्यास्य सूक्तस्य काण्वः पर्वत ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ॥

१॥ य इन्द्र सोमपातमो मदः शविष्ठ चेतति । येना हंसि न्यत्रिणं तमीमहे ॥१॥
येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् । येना समुद्रमाविथा तमीमहे ॥२॥
येन सिन्धुं महीरपो रथाँ इव प्रचोदयः । पन्थामृतस्य यातवे तमीमहे ॥३॥
इमं स्तोममभिष्टये घृतं न पूतमद्रिवः । येना नु सद्य ओजसा ववक्षिथ ॥४॥
इमं जुषस्व गिर्वणः समुद्र इव पिन्वते । इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ॥५॥

12.

Yá indra somapátamo mádaḥ ṣavishṭha cétati | yénā háṅsi ny àtríṇam tám īmahe || 1 || yénā dáṣagvam ádhrigum vepáyantam svàrṇaram | yénā samudrám ávithā tám īmahe || 2 || yéna síndhum mahír apó ráthaṅ iva pracodáyaḥ | pánthām ṛitásya yátave tám īmahe || 3 || imám stómam abhíshṭaye ghṛitám ná pūtám adrivaḥ | yénā nú sadyá ójasā vavákshitha || 4 || imám jushasva girvaṇaḥ samudrá iva pinvate | índra víṣvābhir ūtíbhir vavákshitha || 5 || 1 ||

O adorable Lord, worshipped from eternity, showerer of blessings even now, may you bless our sacred works, and cherish your own person or form (i.e. be loving to your entire creation). May you bestow prosperity on us. 10

12

O Lord of resplendence, extremely powerful, we adore you, as you subdue the evil of greed, through the ecstasy of spiritual joy. 1

Through the same ecstasy, you help the earth, on which ten month's sacrifices are accomplished, the sun, the golden trembling-leader of heaven, and vast firmament, and as such, we adore you. 2

Through the same joy, you drive forth mighty floods of waters to the ocean and vice versa, like the charioteers their cars to the goal ; and as such, we adore you, to be led along the path of immortality. 3

O possessor of adamantine will-power, may you accept this laudation of ours, pure like the consecrated butter; whereby you promptly magnify your valour. 4

O the lover of sincere adoration, may you be delighted by our chants which flow abundant like the sea; by your protective strength, you convey as (to happiness). 5

॥२॥ यो नो देवः परावतः सखित्वनाय मामहे । दिवो न वृष्टिं प्रथयन्ववक्षिथ ॥६॥
ववक्षुरस्य केतवो उत वज्रो गभस्त्योः । यत्सूर्यो न रोदसी अवर्धयत् ॥७॥
यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः । आदित्त इन्द्रियं महि प्र वावृधे ॥८॥
इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति । अग्निर्वनेव सासहिः प्र वावृधे ॥९॥
इयं त ऋत्वियावती धीतिरेति नवीयसी । सपर्यन्ती पुरुप्रिया मिमीत इत् ॥१०॥

yó no deváḥ parāvátaḥ sakhitvanáya māmahé | divó ná vṛishṭím pratháyan vavákshitha || 6 || vavakshúr asya ketávo utá vájro gábhastyoḥ | yát sū́ryo ná ródasī ávardhayat || 7 || yádi pravṛiddha satpate sahásram mahisháñ ághaḥ | ā́d ít ta indriyám máhi prá vāvṛidhe || 8 || índraḥ sū́ryasya raṣmíbhir ny àrṣasānám oshati | agnír váneva sāsahíḥ prá vāvṛidhe || 9 || iyáṃ ta ṛitvíyāvatī dhītír eti návīyasī | saparyántī purupriyā́ mímīta ít || 10 || 2 ||

॥३॥ गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् । स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥११॥
सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये । प्राची वाशीव सुन्वते मिमीत इत् ॥१२॥
यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः । घृतं न पिप्य आसन्यृतस्य यत् ॥१३॥

gárbho yajñásya devayúḥ krátum punīta ānushák | stómair índrasya vāvṛidhe mímīta ít || 11 | sanír mitrásya papratha índraḥ sómasya pītáye | prā́cī vā́ṣīva sunvaté mímīta ít || 12 || yáṃ víprā ukthávāhaso 'bhipramandúr āyávaḥ | ghritáṃ ná pipya āsány ṛitásya yát || 13 ||

The supreme Lord, coming from afar, showers blessings to maintain the bond of friendship. By spreading them upon us, like rain waters from the sky, you convey us (to happiness). 6

The banners that mark Him are flying high; He bears the thunderbolt in His arms. Like the sun, He magnifies His glory in heaven and on earth. 7

O powerful Lord of resplendence, the protector of truth, when you put an end to hundreds of evils, your resplendence grows beyond limits. 8

The Lord of resplendence consumes the obstacles with the rays of the blazing sun. Like fire, conquering the woods, He spreads victorious. 9

Our latest thoughts, pertaining to the season, approach you. Serving and all-loving, it metes and marks. 10

The pious germ of the sacred work in due succession purifies the soul. Through the adoration, it magnifies the glory of the resplendent Lord, and thus it metes and marks. 11

The Lord of resplendence, the benefactor of his friend, magnifies Himself to enjoy the elixir of divotional love in like manner as the worshipper's sweet speech dilates, and thus it metes and marks. 12

He is the one whom our enlightened sages and other men with long and dedicated life offer their hymns and gladden. I pour the oblation of sacrifice, like of butter, into the mouth to swell the flame;—such is the work of the cosmic sacrifice. 13

उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत । पुरुप्रशस्तमूतय ऋतस्य यत ॥१४॥
अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत ॥१५॥

utá svaráje
áditi stómam índrāya jījanat | purupraṣastám ūtáya ṛitásya
yát || 14 || abhí váhnaya ūtáyé 'nūshata práṣastaye | ná deva
vívratā hárī ṛitásya yát || 15 || 3 ||

४॥ यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये । यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥१६॥
यद्वा शक्र परावति समुद्रे अधि मन्दसे । अस्माकमित्सुते रणा समिन्दुभिः ॥१७॥

yát sómam indra víshṇavi yád vā gha tritá āptyé | yád
vā marútsu mándase sám índubhiḥ || 16 || yád vā ṣakra pa-
rāváti samudré ádhi mándase | asmákam ít suté raṇā sám
índubhiḥ || 17 ||

यद्वासि सुन्वतो वृधो यजमानस्य सत्पते । उक्थे वा यस्य रण्यसि समिन्दुभिः ॥१८॥
देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि । अधा यज्ञाय तुर्वणे व्यानशुः ॥१९॥
यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् । होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥२०॥

yád vā́si sunvató vṛidhó yájamānasya sat-
pate | ukthé vā yásya ráṇyasi sám índubhiḥ || 18 || devám
-devam vó 'vasa índram-indram gṛiṇíshaṇi | ádhā yajñáya
turváṇe vy ā̀naṣuḥ || 19 || yajñébhir yajñávāhasam sómebhiḥ
somapátamam | hótrābhir índram vāvṛidhur vy ā̀naṣuḥ
|| 20 || 4 ||

The mother Infinity brings forth a hymn for the self-radiant Lord of resplendence. For our protection, such is the work of cosmic sacrifice. 14

The ministering priests sing their songs for their excellent protection. O divine, now your multi-functioned pair of forces (physical and spiritual) bears you here. Such is the work of cosmic sacrifice. 15

If, O Lord of resplendence, you are pleased to cherish the divine elixir along with the sun or with the waters of three regions or the water-bearing clouds, may you rejoice in this elixir of ours in flowing drops. 16

Or, O mighty Lord, if you feel delighted of the elixir in the ocean of far away regions, may you, so now, rejoice in this elixir of ours in flowing drops. 17

Inasmuch as, O protector of eternal law, you augment the fame of minstrel priest who prays or him by whose praises you are propitiated, so now may you rejoice in this elixir of ours in flowing drops. 18

Then may you (O devotee), for your protection, magnify the glory of everyone endowed with radiant divinity and every divinity with resplendence. To perform such acts that are removers of obstructions, may you assemble and pray. 19

They (the devotees) magnify Him, the inspirer of noble deeds and the rejoicer of devotional elixir. They magnify the Lord of resplendence by sacred hymns; hence may you assemble and pray. 20

म॒हीर॑स्य॒ प्रणी॑तयः पू॒र्वीरु॒त प्रश॑स्तयः । विश्वा॒ वसू॑नि दा॒शुषे॒ व्या॑नशुः ॥२१॥
इन्द्रं॑ वृ॒त्राय॒ हन्त॑वे दे॒वासो॑ दधिरे पु॒रः । इन्द्रं॒ वाणी॑रनूषता॒ समोज॑से ॥२२॥
म॒हान्तं॑ महि॒ना व॒यं स्तोमे॑भिर्हवन॒श्रुत॑म् । अ॒र्कैर॒भि प्र णो॑नुमः॒ समोज॑से ॥२३॥

mahír asya práṇītayaḥ pūrvír utá práṣastayaḥ | víṣvā vásūni dāṣúshe vy ànaṣuḥ || 21 || índram vṛitráya hántave deváso dadhire puráḥ | índram váṇīr anūshatā sám ójase || 22 || mahántam mahiná vayám stómebhir havanaṣrútam | **arkaír** abhí prá ṇonumaḥ sám ójase || 23 ||

न यं वि॑वि॒क्तो रोद॑सी॒ नान्तरि॑क्षाणि व॒ज्रिण॑म् । अमा॒दिद॑स्य तित्विषे॒ समोज॑सः ॥२४॥
यदि॑न्द्र पृत॒नाज्ये॑ दे॒वास्त्वा॑ दधि॒रे पु॒रः । आदित्ते॑ हर्य॒ता हरी॑ ववक्षतुः ॥२५॥

ná yáṃ viviktó ródasī nántárikshāṇi vajríṇam | ámād íd asya titvishe sám ójasaḥ || 24 || yád indra pṛitanájye devás tvā dadhiré puráḥ | ád ít te haryatá hárī vavakshatuḥ || 25 || 5 ||

य॒दा वृ॒त्रं न॑दी॒वृतं॒ शव॑सा वज्रि॒न्नव॑धीः । आदित्ते॑ हर्य॒ता हरी॑ ववक्षतुः ॥२६॥
य॒दा ते॒ विष्णु॒रोज॑सा॒ त्रीणि॑ प॒दा वि॑चक्र॒मे । आदित्ते॑ हर्य॒ता हरी॑ ववक्षतुः ॥२७॥
य॒दा ते॑ हर्य॒ता हरी॑ वावृ॒धाते॑ दि॒वेदि॑वे । आदित्ते॒ विश्वा॒ भुव॑नानि येमिरे ॥२८॥

yadá vṛitráṃ nadīvṛítaṃ ṣávasā vajrinn ávadhīḥ | ád ít te — || 26 || yadá te víshṇur ójasā tríṇi padá vicakrame | ád ít te — || 27 || yadá te haryatá hárī vāvṛidháte divé-dive | ád ít te víṣva bhúvanāni yemire || 28 ||

His creativities are extensive and His splendours manifold. He grants all sorts of wealth to liberal donors; hence may you assemble and pray. 21

All Nature's bounties accept the Lord of resplendence as their foremost leader for destroying the demon of evils. The words of prayer have been addressed to Lord for our gain of vigour. 22

We repeatedly glorify with holy hymns the Lord who is great with His magnanimity, and who listens to our invocations for our gain of vigour. 23

Neither the earth, nor the heaven, nor the firmament stands separated from the Lord of adamantine justice. Verily through the radiance of this mighty one, the whole universe is lighted for our gain of vigour. 24

When the divine powers, O Lord of resplendence, accept you as their leader to fight the furious battle, then your two charming steeds—physical and mental powers—carry you forward. 25

O thunderer, when you with your might crush the demon of nescience, the obstructor of the flood of wisdom, your two charming steeds carry you forward. 26

When, the sun through your energy steps his three paces, your two charming steeds carry you forward. 27

When your two charming steeds augment day by day, the entire creation bows down to you. 28

यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे । आदित्ते विश्वा भुवनानि येमिरे ॥२९॥
यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः । आदित्ते विश्वा भुवनानि येमिरे ॥३०॥
इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥
यदस्य धामनि प्रिये समीचीनासो अस्वरन् । नाभा यज्ञस्य दोहना प्राध्वरे ॥३२॥
सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ॥३३॥

yadá te má-
rutīr víṣas túbhyam indra niyemiré | ád ít te v. — || 29 ||
yadā́ sū́ryam amúm diví ṣukrám jyótir ádhārayaḥ | ád ít te v. — || 30 || imā́m ta indra sushṭutím vípra iyarti dhītíbhiḥ | jāmím padéva pípratīm prā́dhvaré || 31 || yád asya dhā́mani priyé samīcīnā́so ásvaran | nā́bhā yajñásya dohánā prā́dhvaré || 32 || suvī́ryam sváṣvyam sugávyam indra daddhi naḥ | hóteva pūrvácittaye prā́dhvaré || 33 || ६ ||

[अथ तृतीयोऽनुवाकः ॥] (१३) त्रयोदशं सूक्तम्

(१-३३) त्रयस्त्रिंशदृचस्यास्य सूक्तस्य काण्वो नारद ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ॥

॥७॥ इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् । विदे वृधस्य दक्षसो महान्हि षः ॥१॥
स प्रथमे व्योमनि देवानां सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥

13.

Índraḥ sutéshu sómeshu krátum punīta ukthyàm | vidé vṛidhásya dákshaso mahā́n hí sháḥ || 1 || sá prathamé vyòmani devā́nām sádane vṛidháḥ | supāráḥ suṣrávastamaḥ sám apsujít || 2 ||

When, O Lord of resplendence, all the vital elements your subordinates, humbly submit to you, the entire creation bows down to you. 29

When the yonder sun, that brilliant radiance, is placed high in the heaven, the entire creation bows down to you. 30

To you, O Lord of resplendence, the sage raises his voice of devotional prayer with full faith, akin and leading as on foot to sacrifice. 31

When, in a dear dwelling place, situated on the navel (of earth), the congregated devotees, aspirants of the milk of the sacrifice, raise their voice (of prayer), (then) 32

—O Lord of resplendence, grant us wealth in the form of brave men, good steeds, and kine; as a priest, I pray at this sacrifice, to ensure your prior consideration. 33

13

As the elixir of divine love flows, the Lord of resplendence sanctifies the actions and words of the devotee for the gain of his strength, for He is great. 1

He augments in the foremost region of heaven, the abode of Nature's bounties; He is the saviour, the most glorious and overcomer of the obstructions in the midspace (which prevent the rainfall). 2

तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम् । भवा नः सुम्ने अन्तमः सखा वृधे ॥३॥
इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि ॥४॥
नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे । रयिं नश्चित्रमा भरा स्वर्विदम् ॥५॥

tám ahve vájasātaya índram bhárāya ṣushmíṇam | bhávā naḥ sumné ántamaḥ sákhā vṛidhé || 3 || iyáṃ ta indra girvaṇo rātíḥ ksharati sunvatáḥ | mandanó asyá barhísho ví rājasi || 4 || nūnáṃ tád indra daddhi no yát tvā sunvánta ímahe | rayíṃ naṣ citrám á bharā svarvídam || 5 || 7 ||

स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः । वया इवानु रोहते जुषन्त यत् ॥६॥
प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् । मदेमदे ववक्षिथा सुकृत्वने ॥७॥
क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः । अया धिया य उच्यते पतिर्दिवः ॥८॥
उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी । नमोवृधैरवस्युभिः सुते रण ॥९॥
स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा । गन्तारा दाशुषो गृहं नमस्विनः ॥१०॥

stotá yát te vícarshaṇir atiprasardháyad gíraḥ | vayá ivánu rohate jushánta yát || 6 || pratnaváj janayā gíraḥ ṣṛiṇudhí jaritúr hávam | máde-made vavakshithā sukṛítvane || 7 || kríḷanty asya sūnṛítā ápo ná pravátā yatíḥ | ayá dhiyá yá ucyáte pátir diváḥ || 8 || utó pátir yá ucyáte krishṭīnám éka íd vaṣí | namovṛidhaír avasyúbhiḥ suté raṇa || 9 || stuhí ṣrutáṃ vipaṣcítaṃ hárī yásya prasakshíṇā | gántārā dāṣúsho gṛiháṃ namasvínaḥ || 10 || 8 ||

I invoke the mighty resplendent Lord for obtaining food and strength in the battle of life. May He always remain close to us for our happiness, and be a friend for our increase. 3

O resplendent Lord, the one who is gratified by praise, the stream of prayful melodies is flowing for your delight; thereon, rejoicing, you shine forth in the tender hearts of devotees. 4

O Lord of resplendence, may you grant us that which we wish to obtain through our prayers. Bring us such manifold wealth that takes us to divine happiness. 5

When the enthusiast worshipper boldly sings his songs to you, and when they have been accepted, they grow like branches of a tree. 6

May you inspire the devotional songs now as ever and hear the invocation of a devotee. At every rejoicing, may you bear your blessings to the pious worker. 7

The kind and true words of Him, who is spoken off in this hymn as the Lord of celestial region, sportingly come down with speed along a slope like waters. 8

Or, He alone is called Lord, the single sovereign ruler of men. Whilst the reverential devotees seek His protection, may He cherish the devotional love. 9

May you praise Him who is glorious and wise, and whose blessings, material and spiritual, proceed to the abode of the liberal and devout donor. 10

॥९॥ तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः । आ याहि यज्ञमाशुभिः शमिद्धि ते ॥११॥
इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय । श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥१२॥
हवे त्वा सूर उदिते हवे मध्यंदिने दिवः । जुषाण इन्द्र सप्तिभिर्न आ गहि ॥१३॥
आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः । तन्तुं तनुष्व पूर्व्यं यथा विदे ॥१४॥
यच्छक्रासि परावति यदर्वावति वृत्रहन् । यद्वा समुद्रे अन्धसोऽवितेदसि ॥१५॥

tūtujānó mahematé 'ṣvebhiḥ prushitápsubhiḥ | á yāhi yajñám āṣúbhiḥ ṣám íd dhí te || 11 || índra ṣavishṭha satpate rayíṃ griṇátsu dhāraya | ṣrávaḥ sūríbhyo amṛ́taṃ vasutvanám || 12 || háve tvā sū́ra údite háve madhyáṃdine diváḥ | jushāṇá indra sáptibhir na ā́ gahi || 13 || ā́ tū́ gahi prá tú drava mátsvā sutásya gómataḥ | tántuṃ tanushva pūrvyáṃ yáthā vidé || 14 || yác chakrási parāváti yád arvāváti vṛitrahan | yád vā samudré ándhaso 'vitéd asi || 15 || ९ ||

॥१०॥ इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः । इन्द्रे हविष्मतीर्विशो अराणिषुः ॥१६॥
तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः । इन्द्रं क्षोणीरवर्धयन्वया इव ॥१७॥
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः सदावृधम् ॥१८॥

índraṃ vardhantu no gíra índraṃ sutása índavaḥ | índre havíshmatīr víṣo arāṇishuḥ || 16 || tám íd víprā avasyávaḥ pravátvatībhir ūtíbhiḥ | índraṃ kshoṇír avardhayan vayā́ iva || 17 || tríkadrukeshu cétanaṃ deváso yajñám atnata | tám íd vardhantu no gíraḥ sadā́vṛidham || 18 ||

O exceedingly wise, the one quick in speed, may you come with your fastmoving charming cosmic steeds to bless our benevolent works; this verily is your joy. 11

O Lord of resplendence, protector of noble men, mightiest, may you grant wealth to those who adore you and give everlasting fame and opulence to our learned persons. 12

I call you when the sun is risen; I call you at the midday. O Lord of resplendence, may you come to us well pleased with your speedy blessings. 13

May you come forward to us here with speed and rejoice on our offerings of herbal extracts and milk. May you spread the traditional thread, as I know you would. 14

O mighty (refulgent) Lord, destroyer of evils, whether you are far away or near us, or in the unfathomable sea, you are the guardian of food. 15

Let our laudations and devotional prayers augment the glory of the Lord of resplendence. May the people offering homage to the supreme Lord rejoice in His domain. 16

Desiring to obtain protections from the Lord, the men of wisdom magnify His glory by prayers, ample and sublime, as branches shoot out of the stem of the tree. The earth (and other heavenly bodies), whilst spreading like the branches of the tree, also magnify the glory of the resplendent Lord. 17

Divine forces perform dynamic cosmic sacrifice in the three regions. May our laudations strengthen His glory, as He always strengthens us. 18

स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे । शुचिः पावक उच्यते सो अद्भुतः ॥१९॥
तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु । मनो यत्रा वि तद्दधुर्विचेतसः ॥२०॥

stotá
yát te ánuvrata ukthány ṛituthá dadhé | śúciḥ pāvaká ucyate só ádbhutaḥ || 19 || tád íd rudrásya cetati yahvám pratnéshu dhámasu | máno yátrā ví tád dadhúr vícetasaḥ || 20 || 10 ||

॥११॥ यदि मे सख्यमावर इमस्य पाह्यन्धसः । येन विश्वा अति द्विषो अतारिम ॥२१॥
कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः । कदा नो गव्ये अश्व्ये वसौ दधः ॥२२॥
उत ते सुष्टुता हरी वृषणा वहतो रथम् । अजुर्यस्य मदिन्तमं यमीमहे ॥२३॥
तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः । नि बर्हिषि प्रिये सदद्ध द्विता ॥२४॥
वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । धुक्षस्व पिप्युषीमिषमवा च नः ॥२५॥

yádi me sakhyám āvára imásya pāhy ándhasaḥ | yéna víśvā áti dvísho átārima || 21 || kadá ta indra girvaṇa stotá bhavāti śáṃtamaḥ | kadá no gávye áśvye vásau dadhaḥ || 22 || utá te súshṭutā hárī vríshaṇā vahato rátham | ajuryásya madíntamaṃ yám ímahe || 23 || tám īmahe purushṭutáṃ yahváṃ pratnábhir ūtíbhiḥ | ní barhíshi priyé sadad ádha dvitá || 24 || várdhasvā sú purushṭuta ríshishṭutābhir ūtíbhiḥ | dhukshásva pipyúshīm ísham ávā ca naḥ || 25 || 11 ||

॥१२॥ इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः । ऋतादियर्मि ते धियं मनोयुजम् ॥२६॥

índra tvám avitéd asītthá stuvató adrivaḥ | ṛitád iyarmi te dhíyam manoyújam || 26 ||

When the devotee, true to his creed and deeds, glorifies you through his songs in due seasons, they call Him(the Lord) purifier and wonderful. 19

Even the small forces emanating from the Lord of cosmic vitality are very well known in distant and ancient places as extremely powerful, and the highly intelligent persons concentrate their mind thereon. 20

If you choose to be my friend, drink of this sacrificial elixir, so that we may cross over all streams of adversities. 21

O Lord of resplendence, lover of the devotional song, when shall your praiser be most blessed with perfect peace and prosperity? When shall you grant us wealth in herds of cattle and steeds? 22

We adore the one, who by a pair of strong highly praised motive horses (mechanical and gravitational forces) draws the imperishable and most delightful cosmic chariot of universe. 23

With traditionally old offerings we implore the mighty and strong (Lord), whom all adore. He, with His dual nature, is enshrined in our dear hearts. 24

O praised by many a one, may you prosper us with your protecting measures, extolled by seers, and pour down abundant food upon us. 25

O Lord of resplendence, wielder of the bolt of justice, you protect the one who eulogizes you. I approach for favour, which can be well earned by praises. 26

इह त्या सधमाद्या युजानः सोमपीतये । हरी इन्द्र प्रतद्वसू अभि स्वर ॥२७॥
अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् । उतो मरुत्वतीर्विशो अभि प्रयः ॥२८॥

ihá tyā́ sadhamā́dya yujanā́ḥ sómapītaye | hárī indra pratádvasū abhí svara || 27 || abhí svarantu yé táva rudrā́saḥ sakshata śríyam | utó marútvatīr víśo abhí práyaḥ || 28 ||

इमा अस्य प्रतूर्तयः पदं जुषन्त यद्दिवि । नाभा यज्ञस्य सं दधुर्यथा विदे ॥२९॥
अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे । मिमीते यज्ञमानुषग्विचक्ष्य ॥३०॥

imā́ asya prā́turtayaḥ padám jushanta yád diví | nā́bhā yajñásya sáṃ dadhur yáthā vidé || 29 || ayáṃ dīrghā́ya cákshase prā́ci prayaty àdhvaré | mímīte yajñám ānushák vicákshya || 30 || 12 ||

॥१३॥ वृषायमिन्द्र ते रथ उतो ते वृषणा हरी । वृषा त्वं शतक्रतो वृषा हवः ॥३१॥
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषा यज्ञो यमिन्वसि वृषा हवः ॥३२॥
वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः । वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥३३॥

vṛíshāyám indra te rátha utó te vṛíshaṇā hárī | vṛíshā tvám śatakrato vṛíshā hávaḥ || 31 || vṛíshā grā́vā vṛíshā mádo vṛíshā sómo ayáṃ sutáḥ | vṛíshā yajñó yám ínvasi vṛíshā hávaḥ || 32 || vṛíshā tvā vṛíshaṇam huve vájriñ citrā́bhir ūtíbhiḥ | vāvántha hí prátishṭutiṃ vṛíshā hávaḥ || 33 || 13 ||

O resplenedent Lord, having harnessed your steeds (the motive forces), fraught with wealth, and sharing the functions may you consent to come here. 27

Let all the elements of motivation, roar and proclaim your glory, and let all the cloud-bearing winds and their associates take part in this cosmic sacrifice. 28

May His victorious followers hold their place in heaven as they love to do so; may they also come down to the navel place,—I know they would sacrifice. 29

He fulfils this great task of cosmic sacrifice (i.e. creation) in due succession, after duly measuring everything, so that we may behold the light for a long time to come. 30

O resplendent Lord, performer of hundreds of works, showerer of gifts is your chariot, showerer of gifts are your motive forces. You yourself are showerer of blessings and showerers are your invocations. 31

Fruitful are your grinders, fruitful is your joy and fruitful is the flowing elixir of divine love. Fruitful is the sacred worship you inspire and fruitful are our invocations. 32

I invoke the powerful possessor of adamantine will power, with manifold hymns. O showerer, you are worthy of adoration, may our invocations be also a showerer of blessings. 33

(१४) चतुर्दशं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य काण्वायनौ गोषूक्त्यश्वसूक्तिनावृषी । इन्द्रो देवता । गायत्री छन्दः ॥

॥१४॥ यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् ॥१॥
शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे । यदहं गोपतिः स्याम् ॥२॥
धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते । गामश्वं पिप्युषी दुहे ॥३॥

14.

Yád indrāhám yáthā tvám íṣīya vásva éka ít | stotā́ me góshakhā syāt || 1 || ṣíksheyam asmai dítseyam ṣácīpate manīshíṇe | yád ahám gópatiḥ syā́m || 2 || dhenúsh ṭa indra sūnṛ́tā yájamānāya sunvaté | gā́m áṣvam pipyúshī duhe || 3 ||

न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः । यद्दित्ससि स्तुतो मघम् ॥४॥
यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ॥५॥

ná te vartā́sti rā́dhasa índra devó ná mártyaḥ | yád dítsasi stutó maghám || 4 || yajñá índram avardhayad yád bhū́mim vy ávartayat | cakrāṇá opaṣám diví || 5 || 14 ||

॥१५॥ वावृधानस्य ते वयं विश्वा धनानि जिग्युषः । ऊतिमिन्द्रा वृणीमहे ॥६॥
व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद्वलम् ॥७॥
उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ॥८॥

vāvṛidhānásya te vayám víṣvā dhánāni jigyúshaḥ | ūtím indrā́ vṛiṇīmahe || 6 || vy àntárikshaṃ atiran máde sómasya rocanā́ | índro yád ábhinad valám || 7 || úd gā́ ājad áṅgirobhya āvísh kṛiṇván gúhā satī́ḥ | arvā́ñcam nunude valám || 8 ||

14

O resplendent Lord, if I were the sole monarch of wealth, as you have been, then my worshippers would have been rich in kine. 1

O Lord of power, if I were the lord of herds of cattle, then I would have given to that intelligent worshipper plenty as much as I could. 2

O resplendent Lord, the words of praise are like the nourishing milch cow for the worshipper engaged in pious acts, to milk wisdom and vigour in abundance for him. 3

O Lord of resplendence, there is no divine power and no man who can obstruct your munificence. You are sure to give us wealth for which we have been praying. 4

The worship magnifies the glory of the resplendent Lord, while He supports the earth and makes the clouds fertile in firmament. 5

We solicit, O invincible Lord, your protection. Your glory is ever being magnified and you have been the conquerer of all riches. 6

O unparalleled Lord, possessor of marvellous wealth and wisdom, desirous of your protection, we invoke you as men call stout men for help. 1

O resplendent Lord, we depend on you for protection at all our sacred works. You are ever young, fierce and resolute; may you come to us. We, your friends, rely upon you as our protector and benefactor. 2

O Lord of vigour, of wisdom, and of command, Lord of splendour, may you come and drink the effused elixir of sweet devotion. 3

O Lord of resplendence, we are enlightened, but destitute of loving relations. Let us connect ourselves with you, as you are our best loving relation. O, showerer of blessings, come to us with all your glories, to drink the elixir of devotional love. 4

Gathering like a flock of birds, by the side of your exhilarating, heaven-bestowing, celestial beverage mixed with devotion, we repeatedly glorify you, O Lord of resplendence. 5

॥२॥

अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद्वि दीधयः ।
सन्ति कामासो हरिवो ददिष्टं स्मो वयं सन्ति नो धियः ॥६॥
नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः ।
विद्मा पुरा परीणसः ॥७॥
विद्मा सखित्वमुत शूर भोज्यमा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥८॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे ।
सखाय इन्द्रमूतये ॥९॥
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥१०॥

ácha ca tvainá námasa vádāmasi kím múhuṣ cid ví dīdhayaḥ | sánti kámāso harivo dadísh ṭvám smó vayám sánti no dhíyaḥ || 6 || nútnā íd indra te vayám ūtí abhūma nahí nú te adrivaḥ | vidmá purá párīṇasaḥ || 7 || vidmá sakhitvám utá ṣūra bhojyàm á te tá vajrinn īmahe | utó samasminn á ṣiṣīhi no vaṣo váje suṣipra gómati || 8 || yó na idám-idaṁ purá prá vásya āninâya tám u va stushe | sákhāya índram ūtáye || 9 || háryaṣvam sátpatim carshaṇīsáham sá hi shmā yó ámandata | á tú naḥ sá vayati gávyam áṣvyam stotṛíbhyo maghávā ṣatám || 10 || २ ||

॥३॥

त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
संस्थे जनस्य गोमतः ॥११॥
जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः ।
नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः ॥१२॥

tváyā ha svid yujá vayám práti ṣvasántam vrishabha bruvīmahi | saṃsthé jánasya gómataḥ || 11 || jáyema kāré puruhūta kāríṇo 'bhí tishṭhema dūḍhyàḥ | nṛíbhir vṛitrám hanyáma ṣūṣuyáma cáver indra prá ṇo dhíyaḥ || 12 ||

We repeat to you our praises with reverential prayer. Why do you still hesitate ? O master of vigour, you are liberal; let our desires be granted. We are yours and our hymns are for you. 6

O wielder of the bolt of justice, not in recent times alone, have we obtained your protection; we do not yet know of anyone, old and aged, who is a greater benefactor than you. 7

O possessor of adamantine will power, we acknowledge your friendship, and your rich rewards to be enjoyed through you, and solicit both of them of you. O giver of dwellings, Lord of exellent splendour, may you sustain us in all abundance and in cattle and milk. 8

O my friends, I glorify that Lord of resplendence, who brings to us of old this or that exellent wealth. 9

The one, who glorifies the Lord of energies, the protector of the good, the over-comer of enemies, obtains happiness. May the bounteous Lord bestow upon his worshippers hundreds of riches in cattle and horses. 10

O showerer of blessings, may we, with you as our ally, withstand the man, who, in alliance with a man possessing vast wealth, assails us in contest. 11

O much invoked Lord of resplendence, may we conquer in battle those contending against us; and may we resist the malignant. May we, aided by the leaders, destroy the demon of evil forces; may we be prosperous, and may you protect our sacred works. 12

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
युधेदापित्वमिच्छसे ॥१३॥
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥१४॥
मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः ।
नि षदाम सचा सुते ॥१५॥

abhrā-trivyó aná tvám ánāpir indra janúshā sanád asi | yudhéd āpitvám ichase || 13 || nákī revántaṃ sakhyáya vindase píyanti te surāṣvāḥ | yadá kriṇóshi nadanúṃ sám ūhasy ád ít pitéva hūyase || 14 || má te amājúro yathā mūrása indra sakhyé tvávataḥ | ní shadāma sácā suté || 15 || 3 ||

मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥१६॥
इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु ।
त्वं वा चित्र दाशुषे ॥१७॥
चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ।
पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥१८॥

má te godatra nír arāma rádhasa índra má te grihā-mahi | driḷhá cid aryáḥ prá mriṣābhy á bhara ná te dāmána ādábhe || 16 || índro vā ghéd íyan magháṃ sárasvatī vā subhágā dadír vásu | tváṃ vā citra daṣúshe || 17 || citrá íd rájā rājaká íd anyaké yaké sárasvatīṃ ánu | parjánya iva tatánad dhí vrishṭyá sahásram ayútā dádat || 18 || 4 ||

O resplendent Lord, since eternity you have neither rival nor any companion. Surely you seek company of one who loves to fight against the odds of life. 13

Surely you do not acknowledge friendship of the wealthy man. Those who are puffed up with wine offend you. When invoked as a protector, you promote sacred worship and expel niggardliness. 14

O Lord of resplendence, let us not, like fools, disregard your friendship, and lose for nothing a friend like yours. Let us all assemble together to accomplish the sacred duties. 15

O resplendent Lord, giver of cattle, may we not miss your gracious gifts; let us not accept it from anyone other than you. May you, O Lord, confirm to us permanent riches; bestow them upon us. Your gifts can never be made vain. 16

Is it not the resplendent Lord, that gives to the liberal donor so much affluence? Or is it not the auspicious divine speech, that gives such a marvellous treasure? Surely it is you, O wondrous Lord, who gives it. 17

Verily the wonderful Lord, giving thousands and tens of thousands to His people, overspreads His glory, far beyond, than what other petty kinglings, on the river side, could do. The lord of clouds overspreads the earth with rain. 18

(२२) द्वाविंशं सूक्तम्

(१-१८) अष्टादशर्चस्यास्य सूक्तस्य काण्वः सोभरिर्ऋषिः । अश्विनौ देवते । (१-६) प्रथमादिषड्चां प्रगाथः (विषमर्चा बृहती, समर्चा सतोबृहती). (७) सप्तम्या बृहती. (८) अष्टम्या अनुष्टुप्, (९-१०, १३-१८) नवम्यादिदशम्योस्त्रयोदश्यादिषण्णाञ्च काकुभः प्रगाथः (विषमर्चा ककुप्, समर्चा सतोबृहती). (११) एकादश्याः ककुप्. (१२) द्वादश्याश्च मध्येज्योतिस्त्रिष्टुप् छन्दांसि ॥

॥५॥

ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये ।
यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥१॥
पूर्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥२॥

22.

Ó tyám ahva á rátham adyá dáṅsishṭham ūtáye | yám aṣvinā suhavā rudravartanī á sūryáyai tastháthuḥ || 1 || pūrvāpúsham suhávam puruspṛíham bhujyúm vájeshu púrvyam | sacanávantam sumatíbhiḥ sobhare vídveshasam anehásam || 2 ||

इह त्या पुरुभूतमा देवा नमोभिरश्विना ।
अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥३॥
युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।
अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥४॥
रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥५॥

ihá tyá purubhútama devá námobhir aṣvínā | arvācīná sv ávase karāmahe gántārā daṣúsho gṛihám || 3 || yuvó ráthasya pári cakrám īyata īrmányád vām ishaṇyati | asmáñ áchā sumatír vām ṣubhas patī á dhenúr iva dhāvatu || 4 || rátho yó vām trivandhuró híraṇyabhīṣur aṣvinā | pári dyávāpṛithiví bhúshati ṣrutás téna nāsatyá gatam || 5 || 5 ||

22

I invoke today for our protection that splendid cosmic chariot, on which, O adorable twin-divines, ascending along the red-coloured paths, you proceed to wed the divine dawn. 1

O pious benefactor, celebrate with praises the chariot, which is the supporter of former (praisers), easily invoked, much-longed for, the preserver, the foremost in battles, reliable, the scatterer of enemies, and without a rival or foe. 2

We incite by our adorations on this occasion the omnipresent twin-divines, the overcomers of foes, so that they may come down for our protection and proceed to the dwelling of the worshipper. 3

One of the wheels of your chariot moves in every direction; the other, speeds for you on its onward course. O Lords of rain, let your benevolence hasten towards us as a cow to her calf. 4

O twin-divines, your celebrated chariot has a triple seat and reins of gold. That famous chariot traverses the heaven and earth, thereon, O ever-true divines, come to us. 5

॥६॥ दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥६॥
उप नो वाजिनीवसू यातमृतस्य पथिभिः ।
येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः ॥७॥

daṣasyántā mánave pūrvyáṃ diví yávaṃ vṛíkeṇa karshathaḥ | tá vām adyá sumatíbhiḥ ṣubhas patī áṣvinā prá stuvīmahi || 6 || úpa no vājinīvasū yātám ṛitásya pathíbhiḥ | yébhis tṛikshíṃ vṛishaṇā trasadasyavám mahé kshatráya jínvathaḥ || 7 ||

अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥८॥
आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू ।
युञ्जाथां पीवरीरिषः ॥९॥

ayáṃ vām ádribhiḥ sutáḥ sómo narā vṛishaṇvasū | á yātaṃ sómapītaye píbataṃ dāṣúsho gṛihé || 8 || á hí ruhátam aṣvinā ráthe kóṣe hiraṇyáye vṛishaṇvasū | yuñjāthaṃ pívarīr íshaḥ || 9 ||

याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥१०॥

yábhiḥ pakthám ávatho yábhir ádhriguṃ yábhir babhrúṃ víjoshasam | tábhir no makshú túyam aṣvinā gatam bhishajyátaṃ yád áturam || 10 || ६ ||

O twin-divines, Lords of splendour, bestowing upon mankind the rain from the firmament, you enable him to cultivate the soil with plough and reap the barley. Now, therefore, we exalt you both with praises. 6

O twin-divines, lords of precious wealth, showerers of blessings, come to us by those paths of eternal cosmic order, by which you have been going to cherish the fearless men, the overcomers of lawless robbers, and grant them vast wealth. 7

O leaders of cosmic sacrifice, affluent in rain, this elixir of divine love has been expressed by the hard work (grinding with stones) for you; come to enjoy this elixir. May you be pleased to drink it in the dwelling of the pious worshipper. 8

O twin-divines, Lords of plenteous wealth, ascend your cosmic golden chariot, a store-house of coarse food and bring it to us. 9

O twin-divines, with speed come to us with those protections with which you cure the rickety, the rheumatic and the leucodermic patients while they are engaged in propitiating you, and administer medicine to the sick. 10

॥७॥ यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे ।
वयं गीर्भिर्विपन्यवः ॥११॥
ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम् ।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥१२॥
ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे ।
ता ऊ नमोभिरीमहे ॥१३॥
ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी ।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम् ॥१४॥
आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी ।
हुवे पितेव सोभरी ॥१५॥

yád ádhrigāvo ádhrigū idá cid áhno aṣvínā hávāmahe | vayáṃ gīrbhír vipanyávaḥ || 11 || tábhir á yātaṃ vṛishaṇópa me hávaṃ viṣvápsuṃ viṣvávāryam | ishá máṅhishṭhā purubhútamā narā yábhiḥ kríviṃ vāvṛidhús tábhir á gatam || 12 || táv idá cid áhānāṃ táv aṣvínā vándamāna úpa bruve | tá u námobhir īmahe || 13 || táv íd doshá tá ushási ṣubhás pátī tá yáman rudrávartanī | má no mártāya ripáve vājinīvasū paró rudrāv áti khyatam || 14 || á súgmyāya súgmyam prātá ráthenāṣvínā vā sakshánī | huvé pitéva sóbharī || 15 || 7 ||

॥८॥ मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः ।
आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥१६॥
आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा ।
गोमद्दस्रा हिरण्यवत् ॥१७॥

mánojavasā vṛishaṇā madacyutā makshuṃgamábhir ūtíbhiḥ | árāttāc cid bhūtam asmé ávase pūrvíbhiḥ purubhojasā || 16 || á no áṣvāvad aṣvinā vartír yāsishṭam madhupātamā narā | gómad dasrā híraṇyavat || 17 ||

We, the dedicated chanters, continuously invoke you with our hymns, while you speedily go to the assigned duty at the dawn of the day. 11

O showerers of blessings, leaders, come in response to my manifold all propitiating invocations with your necessary protections; you are munificent in gifts, overcomers of numerous foes and augmenters of hard workers. May you come with your protections hitherward. 12

I address to both of these twin-divines, whom I adore with reverence at break of day. 13

We adore those protectors of pious persons, traversers of fierce paths, at eve, at dawn, and at mid-day. Therefore, O vital powers, Lords of nourishing food, hereafter give us not utterly as prey to mortal foe. 14

O inseparable twin-divines, may you bring happiness in your chariot at early dawn for me, who solicits happiness of you. The pious devotee invokes you both in the same way as his father (did). 15

O swift as thought, the showerers of blessings, the humiliator of the arrogant, givers of enjoyment to many, may you be ever near to us for our security, with your many and prompt protections. 16

O twin-divines, wonder-workers, drinkers of the sweetness, O leaders, come to our dwellings, abounding with horses, with cattle and with gold. 17

सुप्रावर्गं सुवीर्यं सुष्टु वार्यमनाधृष्टं रक्षस्विना ।
अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥१८॥

suprävargáṃ
suvíryaṃ sushṭhú váryam ánādhṛishṭaṃ rakshasvínā | asmínn
á väm āyánc vājinīvasū vísvā vāmáni dhīmahi || 18 || 8 ||

(२३) त्रयोविंशं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य वैयश्वो विश्वमना ऋषिः । अग्निर्देवता । उष्णिक् छन्दः ॥

॥७॥ ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसम् । चरिष्णुधूममगृभीतशोचिषम् ॥१॥
दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा । उत स्तुषे विष्पर्धसो रथानाम् ॥२॥
येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे । उपविदा वह्निर्विन्दते वसु ॥३॥
उदस्य शोचिरस्थाद्दीदियुषो व्य१जरम् । तपुर्जम्भस्य सुद्युतो गणश्रियः ॥४॥
उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा ।
अभिख्या भासा बृहता शुशुक्वनिः ॥५॥

23.

Ī́ḷishvā hí pratīvyàṃ yájasva jātávedasam | carishṇúdhūmam ágṛibhītaṣocisham || 1 || dāmánaṃ viṣvacarshaṇe 'gníṃ viṣvamano girá | utá stushe víshpardhaso ráthānam || 2 || yéshām ābādhá ṛigmíya isháḥ prikshás ca nigrábhe | upavídā váhnir vindate vásu || 3 || úd asya ṣocír asthād dīdiyúsho vy àjáram | tápurjambhasya sudyúto gaṇaṣríyaḥ || 4 || úd u tishṭha svadhvara stávāno devyá kṛipá | abhikhyá bhāsá bṛihatá ṣuṣukvániḥ || 5 || 9 ||

May we obtain from you that wealth which is spontaneously bestowed, which is strong, firm, excellent, and unassailable by lawless people. At your coming this way, may we obtain from you, Lords of ample wealth and wisdom, all good things. 18

23

May you adore that omniscient fire divine, who encounters enemies, whose smoke wanders at will and who is of unobstructed radiance. 1

May you, the all-beholding, and the beloved of all, commend with songs the fire-divine, who gives means of conveyance to the unenvious devotees. 2

The (fire-divine), the bearer of oblations, is the repeller of foes and is to be glorified by hymns. He arrests the food and drink, and also takes away wealth of those of whom he fore-knows (the neglect of sacrifices). 3

His imperishable lustre and radiance rise high. His bright blazing teeth, like flames, are glorious among all the people. 4

O embodiment of benevolence, the one who is worthily worshipped and glorified, may you rise up with celestial lustre. Verily, you are radiant with lofty splendour. 5

॥१०॥ अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥६॥
अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् । तमया वाचा गृणे तमु वः स्तुषे ॥७॥
यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् । मित्रं न जने सुधितमृतावनि ॥८॥
ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमसस्पदे ॥९॥
अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः ।
होता यो अस्ति विक्ष्वा यशस्तमः ॥१०॥

ágne yāhí susastíbhir havyá júhvana ānushák | yáthā dūtó babhūtha havyavábanaḥ || 6 || agním vaḥ pūrvyám huve hótāram carshaṇīnám | tám ayá vācá gṛiṇe tám u va stushe || 7 || yajnébhir ádbhutakratum yám kṛipá sūdáyanta ít | mitrám ná jáne súdhitam ṛitávani || 8 || ṛitávānam ritāyavo yajñásya sádhanam girá | úpo enam jujushur námasas padé || 9 || áchā no angirastamam yajñáso yantu samyátaḥ | hótā yó ásti viksov ā yaṣástamaḥ || 10 || 10 ||

॥११॥ अग्ने तव त्ये अजरेन्धानासो बृहद्भाः । अश्वा इव वृषणस्तविषीयवः ॥११॥
स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यम् । प्राव नस्तोके तनये समत्स्वा ॥१२॥
यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि ।
विश्वेदग्निः प्रति रक्षांसि सेधति ॥१३॥

agne táva tyé ajaréndhānāso bṛihád bháḥ | áṣvā iva vṛishaṇas tavishīyávaḥ || 11 || sá tvám na úrjām pate rayím rāsva suvíryam | práva nas toké tánaye samátsv á || 12 || yád vá u viṣpátiḥ ṣitáḥ súprīto mánusho visí | víṣvéd agníḥ práti rákshāṅsi sedhati || 13 ||

O fire-divine, you are called straight to our offerings. Please come through our eulogies, for you have been our messenger and the bearer of oblations. 6

I invoke for you the fire-divine, who is the ancient ministrant priest of men. I praise him with this hymn, and glorify him for you. 7

It is he, who is marvellous in his working, whom they animate with solemn ceremonies. He is kind as a friend to those men, who preserve the sanctity of the eternal laws. 8

O law-lovers, adore him with praise at the place of work and worship. He is gratified by worship and is the accomplisher of the sacrifice. 9

Let all our sacred performances be presented to chief of the fire priests, the most illustrious amongst men. 10

O undecaying fire-divine, all these vast enkindled lights, shining like horses and like stallions, and showing forth their strength, belong to you. 11

O Lord of fuel and energy, may you give us riches, combined with heroic strength, and defend us, with our sons and grandsons, in our struggles. 12

When the fire-divine, the lord of men, is sharpened by sacrifice, and is well pleased to be present in the homes of mankind, he averts all evil spirits from you. 13

श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
नि मायिनस्तपुषा रक्षसो दह ॥१४॥
न तस्य मायया चन रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातिभिः ॥१५॥

srushṭy àgne návasya me stómasya vira vispate | ní mayínas tápusha raksháso daha || 14 || ná tásya māyáyā caná ripúr ısita mártyaḥ | yó agnáye dadáṣa havyádātibhiḥ || 15 || 11 ||

॥१२॥ व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः । महो राये तमु त्वा समिधीमहि ॥१६॥
उशना काव्यस्त्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसम् ॥१७॥

vyàṣvas tvā vasuvídam ukshaṇyúr aprīṇad ṛíshiḥ | mahó rayé tám u tvā sám idhīmahi || 16 || uṣánā kavyás tvā ní hótaram asadayat | āyajíṃ tvā mánave jatávedasam || 17 ||

विश्वे हि त्वा सजोषसो देवासो दूतमक्रत । श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥१८॥
इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसम् ॥१९॥
तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् । विशामग्निमजरं प्रत्नमीड्यम् ॥२०॥

víṣve hí tvā sajóshaso deváso dūtám ákrata | ṣrushṭí deva prathamó yajñíyo bhuvaḥ || 18 || imám gha vıró amṛítam dutáṃ kṛiṇvıta mártyaḥ | pāvakáṃ krishṇávartaniṃ víhāyasam || 19 || táṃ huvema yatásrucaḥ subhásaṃ ṣukráṣocisham | viṣáṃ agním ajáram pratnám íḍyam || 20 || 12 ||

O brave fire-divine, lord of men, on hearing my new praise, may you consume the guileful lawless people with your flames. 14

No hostile mortal can ever prevail by fraud over him, who serves fire-divine well with sacred presentations. 15

The fast-moving austere sage, the showerer of virility, has been adoring you, O bestower of wealth; so we too enkindle you for acquiring ample riches. 16

Illustrious sage, and his son have been establishing you, O omnipresent, as the ministrant priest, and the offerer of worship for mankind. 17

All the consentient divine powers honour you to accept you as their messenger. May you, O divine fire, the first of all divines, become the object of their worship without delay. 18

May the pious mortal honour this immortal, purifying, smoke-pursuing, mighty one his messenger. 19

Let us with uplifted ladles invoke Him, the brilliant, bright -shining, undecaying, eternal fire-divine, who must be adored by men. 20

॥१३॥ यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् । भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥
प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम् । प्रति स्रुगेति नमसा हविष्मती ॥२२॥
आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत् । मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥२३॥
नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत् । ऋषे वैयश्व दम्यायाग्नये ॥२४॥
अतिथिं मानुषाणां सूनुं वनस्पतीनाम् । विप्रा अग्निमवसे प्रत्नमीळते ॥२५॥

yó asmai havyádātibhir áhutim mártó 'vidhat | bhū́ri pósham sá dhatte vīrávad yáṣaḥ || 21 || prathamáṃ jātávedasam agníṃ yajñéshu pūrvyám | práti srúg eti námasa havíshmatī || 22 || ábhir vidhemāgnáye jyéshṭhābhir vyaṣvavát | máṅhishṭhabhir matíbhiḥ ṣukráṣocishe || 23 || nūnám arca víhāyase stómebhi sthūrayūpavát | ṛíshe vaiyaṣva dámyayāgnáye || 24 || átithim mánushāṇāṃ sūnúṃ vánaspátīnām | víprā agním ávase pratnám īḷate || 25 || 13 ||

॥१४॥ महो विश्वाँ अभि षतोऽभि हव्यानि मानुषा ।
अग्ने नि षत्सि नमसाधि बर्हिषि ॥२६॥
वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः । सुवीर्यस्य प्रजावतो यशस्वतः ॥२७॥
त्वं वरो सुषाम्णेऽग्ने जनाय चोदय । सदा वसो रातिं यविष्ठ शश्वते ॥२८॥

mahó víṣvāñ abhí shatò 'bhí havyā́ni mā́nushā | ágne ní shatsi námasádhi barhíshi || 26 || váṅsvā no vā́ryā purú váṅsva rāyáḥ puruspṛ́haḥ | suvī́ryasya prajā́vato yáṣasvataḥ || 27 || tvámṃ varo sushā́mṇé 'gne jánāya codaya | sádā vaso rātíṃ yavishṭha ṣáṣvate || 28 ||

The man, who by holy presenters of oblations makes offerings to Him, receives ample nourishment, with progeny and fame. 21

The ladle charged with the obl ition proceeds with reverence at sacred ceremonies to tne eternal fire-divine, the first of the Gods, the cognizant of all that exists. 22

Let us glorify the fire-divine, brilliant like an austere sage with these excellent and most pious praises. 23

O austere sage, let us adore, like a confirmed worshipper, the far-spreading, aomestic fire-divine with praises. 24

Pious men honour the eternal fire-divine, the prime source of the forest trees, for protection, like the welcomed guest of men. 25

O fire-divine, be established on the altar of sacred grass, installed with reverence in the presence of all those worshippers to accept the oblations of men. 26

Grant us abundant treasures, grant the opulence, which all crave, comprehending vigour, offspring and fame. 27

O dear Lord, the youngest, the adorable, may you ever bestow riches upon the peaceful and firm person. 28

त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः । महो रायः सातिमग्ने अपा वृधि ॥२९॥
अग्ने त्वं यशा अस्या मित्रावरुणा वह । ऋतावाना सम्राजा पूतदक्षसा ॥३०॥

tvám hí supratū́r ási tvám no gómatīr íshaḥ | mahó rāyáḥ sātím agne ápā vṛidhi || 29 || ágne tvám yaśá asy á mitrā́váruṇā vaha | ṛitávānā samrájā pūtádakshasā || 30 || 14 ||

(२४) चतुर्विंशं सूक्तम्

(१-३०) त्रिंशदृचस्यास्य सूक्तस्य वैयश्वो विश्वमना ऋषिः । (१-२७) प्रथमादिसप्तविंशत्यृचामिन्द्रः, (२८-३०) अष्टाविंश्यादितृचस्य च सौषाम्णस्य वरोर्दानस्तुतिर्देवता । (१-२९) प्रथमाद्येकोनत्रिंशदृचामुष्णिक्, (३०) त्रिंश्याश्चानुष्टुप् छन्दसी ॥

॥१५॥ सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा । मघैर्मघोनो अति शूर दाशसि ॥२॥
स नः स्तवान आ भर रयिं चित्रश्रवस्तमम् । निरेके चिद्यो हरिवो वसुर्ददिः ॥३॥
आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम् । धृषता धृष्णो स्तवमान आ भर ॥४॥

24.

Sákhāya á śishāmahi bráhméndrāya vajríṇe | stushá u shú vo nṛítamāya dhṛishṇáve || 1 || śávasā hy ási śrutó vṛitrahátyena vṛitrahá | maghaír maghóno áti śūra dāśasi || 2 || sá na stávāna á bhara rayíṃ citráśravastamam | nireké cid yó harivo vásur dadíḥ || 3 || á nirekám utá priyám índra dárshi jánānām | dhṛishatá dhṛishṇo stávamāna á bhara || 4 ||

O adorable Lord, verily, you are a liberal benefactor. Bestow upon us food with cattle, and the gift of abundant riches. 29

O illustrious adorable Lord, you are renowned; may you bring hither the veracious, the purely vigorous, and the resplendent divines,—the sun and the ocean. 30

24

O friends, let us earnestly address our prayer to the resplendent Lord, the wielder of the punitive justice; I praise the chief leader and the Lord of resolute will-power for your benefit. 1

O resplendent Lord, you are renowned for your unbounded might and for destroying the devil of ignorance, you are known as nescience-slayer. You are richest among the rich and you distribute riches generously to your devotees. 2

O resplendent Lord, may you, praised by us, bestow upon us riches of wonderful variety. O the Lord of vigour, unmoving as you are, be generous in granting wealth. 3

O Lord of resplendence, may you disclose to your worshippers many sorts of riches, according to their need and choice; glorified by us, may you, who are endowed with resolution, grant us wealth with resolute mind. 4

न ते॑ स॒व्यं न द॑क्षि॒णं हस्तं॑ वरन्त आ॒मुरः॑ । न प॑रि॒बाधो॑ हरिवो॒ गवि॑ष्टिषु ॥५॥

ná te savyáṃ ná dákshiṇaṃ hástaṃ varanta āmúraḥ | ná paribā́dho harivo gávishṭishu || 5 || 15 ||

॥१६॥ आ त्वा॒ गोभि॑रिव व्र॒जं गी॒र्भिर्ऋ॑णोम्यद्रिवः । आ स्मा॒ काम॑ जरि॒तुरा मनः॑ पृण ॥६॥
विश्वा॑नि वि॒श्वम॑नसो धि॒या नो॑ वृत्रहन्तम । उग्र॑ प्रणेत॒रधि॒ षू व॑सो गहि ॥७॥
व॒यं ते॑ अ॒स्य वृ॑त्रहन्वि॒द्याम॑ शूर॒ नव्य॑सः । वसोः॑ स्पा॒र्हस्य॑ पुरुहू॒त राध॑सः ॥८॥
इन्द्र॒ यथा॒ ह्यस्ति॒ तेऽप॑रीतं नृतो॒ शवः॑ । अमृ॑क्ता रा॒तिः पु॑रुहूत दा॒शुषे॑ ॥९॥
आ वृ॑षस्व महामह म॒हे नृ॑तम॒ राध॑से । दृ॒ळ्हश्चि॑द्दृह्य मघवन्म॒घत्त॑ये ॥१०॥

ā́ tvā góbhir iva vrajáṃ gīrbhír riṇomy adrivaḥ | ā́ sma kā́maṃ jaritúr ā́ mánaḥ priṇa || 6 || víṣvāni viṣvámanaso dhiyā́ no vṛitrahantama | úgra praṇetar ádhi shū́ vaso gahi || 7 || vayám te asyá vṛitrahan vidyā́ma ṣūra návyasaḥ | vá-so spārhásya puruhūta rā́dhasaḥ || 8 || índra yáthā hy ásti té 'parītaṃ nṛito ṣávaḥ | ámṛikta rātíḥ puruhūta dāṣúshe || 9 || ā́ vṛishasva mahāmaha mahé nṛitama rā́dhase | dṛiḷhás cid dṛihya maghavan maghā́ttaye || 10 || 16 ||

॥१७॥ नू अ॒न्यत्रा॑ चिदद्रिव॒स्त्वन्नो॑ जग्मुरा॒शसः॑ । मघ॑वञ्छ॒ग्धि तव॒ तन्न॑ ऊ॒तिभिः॑ ॥११॥
न॒ह्य॑१ङ्ग नृ॑तो॒ त्वद॒न्यं वि॒न्दामि॒ राध॑से । रा॒ये द्यु॒म्नाय॒ शव॑से च गिर्वणः ॥१२॥

nū́ anyátra cid adrivas tván no jagmur āṣásaḥ | mágha-vañ chagdhí táva tán na ūtíbhiḥ || 11 || nahy àngá nṛito tvád anyáṃ vindā́mi rā́dhase | rayé dyumnā́ya ṣávase ca girvaṇaḥ || 12 ||

O Lord of vigour, the evil-spirited persons can neither resist your left nor right arm in the effort of regaining the lost wisdom; no one can put obstacle in your progress. 5

I approach you with praises, O thunderer, as a shepherd moves to his pasture with his cattle. May you fulfil the wishes of him who sings your praise. 6

O destroyer of evils, fierce, leader of all, and the lord of wealth, may you preside over all (offerings or deeds) of us, O beloved of all, guide us with your supreme wisdom. 7

May we, O hero, destroyer of evils, invoked by all, become possessed of your new, desirable, and bliss-bestowing wealth and wisdom. 8

O most revered supreme leader of men, invoked by many, your strength is irresistible, and so is your munificence to your devotees, unlimited and unchecked. 9

O most adorable, supreme leader of universe, bounteous Lord, may you invigorate yourself for distributing great wealth and consume the strongholds of evil forces for raising wealth. 10

O wielder of the bolt of punitive justice, our solicitations have never been addressed to forces other than you; therefore, O bounteous Lord, make us strong with your help and protection. 11

O impeller Lord, object of our adoration, I implore no other than you for obtaining sustenance, riches, reputation, and strength. 12

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधसा चोदयाते महित्वना ॥१३॥
उपो हरीणां पतिं दक्षं पृञ्चन्तमब्रवम् । नूनं श्रुधि स्तुवतो अश्व्यस्य ॥१४॥
नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत् । नकी राया नैवथा न भन्दना ॥१५॥

éndum índraya siñcata píbati somyám mádhu | prá rádhasa codayāte mahitvaná || 13 || úpo hárīṇām pátim dáksham priñcántam abravam | nūnám srudhi stuvató asvyásya || 14 || nahy àngá purá caná jajñé virátaras tvát | nákī rāyá naívátha ná bhandána || 15 || 17 ||

॥१८॥ एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः । एवा हि वीरः स्तवते सदावृधः ॥१६॥
इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् । उदानंश शवसा न भन्दना ॥१७॥

éd u mádhvo madíntaraṃ siñcá vadhvaryo ándhasaḥ | evá hí vīrá stávate sadávṛidhaḥ || 16 || índra sthatar harīṇām nákish ṭe pūrvyástutim | úd anaṅsa sávasa ná bhandána || 17 ||

तं वो वाजानां पतिमहूमहि श्रवस्यवः । अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥१८॥
एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् । कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥१९॥
अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात्स्वादीयो मधुनश्च वोचत ॥२०॥

táṃ vo vájanam pátim áhūmahi sravasyávaḥ | áprāyubhir yajñébhir vavṛidhényam || 18 || éto nv índraṃ stávama sákhaya stómyaṃ náram | krishṭír yó vísva abhy ásty éka ít || 19 || ágorudhāya gavíshe dyukshāya dásmyaṃ vácaḥ | ghṛitát svádiyo mádhunas ca vocata || 20 || 18 ||

Let us express our sweet songs to the Lord of resplendence, let Him accept our loving devotion. He by his might rewards the donor with wealth and wisdom. 13

Let me address the Lord of vigour, who associates his strength with other divine forces. May you hear the words of the austere fast-working sage, when he sings your praise. 14

O Lord of resplendence, no one has ever been born more chivalrous than you; no one has ever been richer than you; no one is better saviour than yourself; no one is more worthy of praise than you. 15

O performers of sacred works, may you offer exhilarating sweet beverage of devotion to the brave Lord alone, who provides prosperity to us. 16

O supreme Lord of resplendence, controller of energies, neither one can ever surpass your power nor can be compared with you in fame or in strength. 17

Desirous of food, we invoke you, O Lord of viands; verily, you are to be magnified by sacrifices offered by the devotees engaged in beneficial work. 18

O friends, let us glorify the Lord of resplendence, who is worthy of adoration; single-handed He overcomes all hostile forces. 19

May you recite agreeable words, sweeter than clarified butter or the celestial elixir, to the illustrious Lord, who appreciates eulogy and never rejects what is offered to Him. 20

॥१९॥ यस्यामितानि वीर्या३ न राधः पर्येतवे । ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥
स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् । अर्यो गयं मंहमानं वि दाशुषे ॥२२॥

yásyámitani vırya ná rádhaḥ páryetave | jyótir ná víśvam abhy ásti dákshiṇa || 21 || stuhíndraṃ vyaśvavád ánurmiṃ vajínaṃ yámam | aryó gáyam máṅhamanaṃ ví daśúshe || 22 ||

एवा नूनमुप स्तुहि वैयश्व दशमं नवम् । सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२३॥
वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् । अहरहः शुन्ध्युः परिपदामिव ॥२४॥
तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने । द्विता कुत्साय शिश्नथो नि चोदय ॥२५॥

evá nūnám úpa stuhi vaíyaśva daśamáṃ návam | súvidvaṅsaṃ carkṛ́tyaṃ caráṇinam || 23 || véttha hí nírṛitīnaṃ vájrahasta parivṛ́jam | áhar-ahaḥ śundhyúḥ paripádām iva || 24 || tád indráva á bhara yéna daṅsishṭha kṛ́tvane | dvitá kútsaya śiśnatho ní codaya || 25 || 19 ||

॥२०॥ तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे ।
स त्वं नो विश्वा अभिमातीः सक्षणिः ॥२६॥
य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु । वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥

tám u tva nunám ımahe návyaṃ daṅsishtha sányase | sá tváṃ no víśva abhímatıḥ sakshániḥ || 26 || yá ṛ́kshad áṅhaso mucád yó váryat saptá síndhushu | vádhar dasásya tuvinṛimṇa nınamaḥ || 27 ||

Whose energies are unbounded; whose bounty can never be surpassed; whose liberality extends like the light of firmament over all. 21

Glorify the resplendent Lord, the unassailable, the powerful, the regulator of men, as is always done by the austere speedy sage; He is the Lord, who gives a spacious mansion to the sincere offerer of the oblation. 22

O children of austere devotees, may you verily praise Him, who to the tenth time is still new. He is adorable, the all-wise, and worthy to be honoured repeatedly. 23

You are the wielder of the bolt of justice, and you know how to avoid destructive powers. He is like a seeker, who knows every day and every step. 24

O splendrous resplendent Lord, bring that aid to the offerer, wherewith to defend him, you have twice slain the enemies for the benefit of enlightened devotees; send the same down to us. 25

O Lord of resplendence and splendour, worthy of adoration, we implore you and adore you for preservation. Verily, you are the overcomer of the troops of all our adversities. 26

He is the one, who rescues men from the wickedness of evil beings, and who enriches devotees on the side of gliding rivers. O extremely bounteous Lord, may you strike the undisciplined infidel with your punitive justice. 27

यथा वरो सुषाम्णे सनिभ्य आवहो रयिम् । व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥
आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः । स्थूरं च राधः शतवत्सहस्रवत् ॥२९॥
यत्त्वा पृच्छादीजानः कुहया कुहयाकृते ।
एषो अपश्रितो वलो गोमतीमव तिष्ठति ॥३०॥

yátha varo sushámṇe saníbhya avaho rayím | vyàṣvebhyaḥ subhage vajinivati || 28 || á nāryásya dákshiṇa vyàṣvaṅ etu somínaḥ | sthūráṃ ca rádhaḥ ṣatávat sahásravat || 29 || yát tva pṛichád ıjanáḥ kuhayá kuhayakṛite | eshó ápaṣrito való gomatím áva tishṭhati || 30 || २० ||

(२५) पञ्चविंशं सूक्तम्

(१-२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य वैयश्वो विश्वमना ऋषिः । (१-९, १३-२४) प्रथमादिनवर्चां त्रयोदश्यादिद्वादशानाञ्च मित्रावरुणौ, (१०-१२) दशम्यादितृचस्य च विश्वे देवा देवताः । (१-२२, २४) प्रथमादिद्वाविंशत्यृचां चतुर्विंश्याश्चोष्णिक्, (२३) त्रयोविंश्याश्चोष्णिग्गर्भा छन्दसी ॥

॥२१॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया । ऋतावाना यजसे पूतदक्षसा ॥१॥
मित्रा तना न रथ्या३ वरुणो यश्च सुक्रतुः । सनात्सुजाता तनया धृतव्रता ॥२॥
ता माता विश्ववेदसासुर्याय प्रमहसा । मही जजानादितिर्ऋतावरी ॥३॥

25.

Ta vaṃ víṣvasya gopá devá devéshu yajñíya | ṛitávana yajase putádakshasa || 1 || mitrá tána ná rathyà váruṇo yáṣ ca sukrátuḥ | sanát sujatá tánaya dhṛitávrata || 2 || tá matá viṣvávedasasuryàya prámahasa | mahí jajānáditir ṛitávari || 3 ||

O revered Lord, as you distribute vast wealth to the pious singers, may you, O gracious wise and powerful, grant riches to the descendants of the austere sages. 28

May the gifts of supreme leader be extended to the austere devotees. May they obtain substantial wealth by hundreds and thousands. 29

O seeker, if anyone asks of you, where he dwells who performs worship, tell him, the noble man has gone to stay on the land rich in cattle. 30

25

I pay homage to you two, who are the protectors of the universe, the divine, the adorable among Nature's bounties, faithful to eternal laws, and whose power is sanctified. 1

The lords of cosmic solar rays and vapours are the doers of good deeds, and like charioteers are the diffusers of riches. They are born of nobility, the sons of mother Infinity, and firm observant of eternal order. 2

The great and veracious mother Eternity gives birth to these two, who are possessed of all affluence. They shine with great splendour for their supreme sway. 3

म॒हान्ता॑ मि॒त्रावरु॑णा स॒म्राजा॑ दे॒वावसु॑रा । ऋ॒तावा॑नावृ॒तमा घो॑षतो बृ॒हत् ॥४॥
नपा॑ता॒ शव॑सो म॒हः सू॒नू दक्ष॑स्य सु॒क्रतू॑ । सृ॒प्रदा॑नू इ॒षो वास्त्वधि॑ क्षि॒तः ॥५॥

mahánta mitrávárunạ samrája deváv ásura | ṛitávānav ṛitám á ghoshato bṛihát || 4 || nápatā ṣávaso maháḥ sūnú dákshasya sukrátu | sṛiprádanū ishó vástv ádhi kshitaḥ || 5 || २१ ||

॥२२॥ सं या दानू॑नि ये॒मथु॑र्दि॒व्याः पार्थि॑वी॒रिषः॑ । नभ॑स्वती॒रा वां॑ चरन्तु वृ॒ष्टयः॑ ॥६॥
अधि॒ या बृ॑ह॒तो दि॒वो॒३॒॑ऽभि यू॒थेव॒ पश्य॑तः । ऋ॒तावा॑ना स॒म्राजा॒ नम॑से हि॒ता ॥७॥
ऋ॒तावा॑ना॒ नि षे॑दतुः साम्रा॑ज्याय सु॒क्रतू॑ । धृ॒तव्र॑ता क्ष॒त्रिया॑ क्ष॒त्रमा॑शतुः ॥८॥

sáṃ yá dánuni yemáthur divyáḥ párthivir íshaḥ | nábhasvatır á vaṃ carantu vṛishṭáyaḥ || 6 || ádhi yá bṛiható divó 'bhí yūthéva páṣyataḥ | ṛitávana samrája námase hitá || 7 || ṛitávanā ní shedatuḥ sámrājyāya sukrátū | dhṛitávratā kshatríya kshatrám aṣatuḥ || 8 ||

अ॒क्ष्णश्चि॑द्गातु॒वित्त॑रानुल्ब॒णेन॒ चक्ष॑सा । नि चि॑न्मि॒षन्ता॑ निचि॒रा नि चि॑क्यतुः ॥९॥
उ॒त नो॑ दे॒व्यदि॑तिरुरु॒ष्यतां॒ नास॑त्या । उ॒रु॒ष्यन्तु॑ म॒रुतो॑ वृ॒द्धश॑वसः ॥१०॥

akshṇáṣ cid gātuvíttara-nulbaṇéna cákshasa | ní cin mishántā nicirá ní cikyatuḥ || 9 || utá no devy áditir urushyátāṃ násatyā | urushyántu marúto vṛiddhásavasaḥ || 10 || २२ ||

The two great lords of cosmic light and water vapours are sovereign rulers, and powerful divines. They are true to eternal laws and proclaimers of our sacred work. 4

They are offsprings of mighty power, source of energy, doers of good deeds and liberal benefactors. They control the cultivation and production of food. 5

May you bestow your good gifts—celestial and terrestrial—upon us. Let your water-shedding rains come to us fraught with the mist of heaven. 6

They are the ones, who are observant of eternal order, worthy of adoration and look down from lofty sky on herds below. 7

They are true to law, doers of good deeds, exceedingly strong, and sit down for the office of sovereignty. Their laws stand firm and fast, and surely they acquire vigour. 8

They are the thorough-knowers of the path, much better than our eye, with unobstructed sight. They perceive even when they close their lids; they have been observants since ever. 9

May the divine mother eternity, may ever-true divines, protect us well; may the vital principles, endowed with mighty strength, guard us well. 10

॥२३॥ ते नो नावमुरुष्यत दिवा नक्तं सुदानवः । अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥
अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे । श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ॥१२॥
तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम् । मित्रो यत्पान्ति वरुणो यदर्यमा ॥१३॥
उत नः सिन्धुरपां तन्मरुतस्तदश्विना । इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥
ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित् । तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥१५॥

té no nāvám urushyata dívā náktam̥ sudānavaḥ | árishyanto ní pāyúbhiḥ sacemahi || 11 || ághnate víshṇave vayám árishyantaḥ sudánave | ṣrudhí svayāvan sindho pūrvácittaye || 12 || tád váryam̥ vriṇīmahe várishṭham̥ gopayátyam | mitró yát pánti váruṇo yád aryamá || 13 || utá naḥ síndhur apám̥ tán marútas tád aṣvínā | índro víshṇur mīḍhváñsaḥ sajóshasaḥ || 14 || té hí shmā vanúsho náro 'bhímātim̥ káyasya cit | tigmám̥ ná kshódaḥ pratighnánti bhúrṇayaḥ || 15 || 23 ||

॥२४॥ अयमेक इत्था पुरूरु चष्टे वि विश्पतिः । तस्य व्रतान्यनु वश्चरामसि ॥१६॥
अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम । मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥
परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः । उभे आ पप्रौ रोदसी महित्वा ॥१८॥

ayám éka itthá purúrú cashṭe ví viṣpátiḥ | tásya vratány ánu vaṣ caramasi || 16 || ánu púrvāṇy okyà sāmrajyásya saṣcima | mitrásya vratá váruṇasya dīrghaṣrút || 17 || pári yó raṣmínā divó 'ntān mamé prithivyáḥ | ubhé ā paprau ródasī mahitvá || 18 ||

O munificent and irresistible, guard our vessel by day and by night so that we may be secure under your protection. 11

May we, uninjured, serve bounteous, all-pervading Lord who harms none. May you, self-moving and kind, hear our prayer on behalf of him who has commenced the worship. 12

We solicit that ample, all-coveted all-guarding wealth, which the lords of light, waters and cosmic order, hold under their protection. 13

And may the one, who causes the water to flow, the vital principles, the twin-divines, the divine lords of resplendence and vital breath, and the showerers of blessings, protect us. 14

These desirable leaders of mankind, rapid in movement, break down the haughtiness of an adversary, as an impetuous current sweeps away all obstacles. 15

This one, the preserver of mankind, single-handed looks forth, far and wide. And we follow the holy laws for our advantage. 16

We observe the old traditional laws, the statutes of supremacy, of the lord of light and water vapours which are widely known. 17

He is the measurer (*mitra*) who measures with his rays the limits of both heaven and earth, and He is venerable (*varuṇa*) who fills both heaven and earth with his majesty. 18

उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान आहुतः ॥१९॥
वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि पित्वोऽविषस्य दावने ॥२०॥

úd u shyá ṣaraṇé divó jyótir
ayaṅsta sū́ryaḥ | agnír ná ṣukráḥ samidhāná áhutaḥ || 19 ||
váco dīrgháprasadmanīṣe vā́jasya gómataḥ | íṣe hí pitvò
'vishásya dāváne || 20 || 24 ||

॥२०॥ तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे । भोजेष्वस्माँ अभ्युच्चरा सदा ॥२१॥
ऋज्रमुक्षण्यायने रजतं हरयाणे । रथं युक्तमसनाम सुषामणि ॥२२॥

tát sū́ryaṃ ródasī ubhé doshā́ vástor úpa bruve | **bho-
jéshv asmā́ṅ** abhy úc cara sádā || 21 || ṛijrám ukshaṇyā́yane
rajatáṃ hárayāṇe | rátham yuktám asanāma sushā́maṇi
|| 22 ||

ता मे अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाहसा ॥२३॥
स्मदभीशू कशावन्ता विप्रा नविष्ठया मती । महो वाजिनावर्वन्ता सचासनम् ॥२४॥

tá me áṣvyānaṃ hárīṇaṃ nitóṣanā | utó nú **kṛítvyā-
nāṃ nṛiváhasā** || 23 || smádabhīṣū káṣavanta vípra **návish-
ṭhayā matí** | mahó vājínāv árvanta sácāsanam || 24 || 25 ||

He, the sun, spreads his radiance aloft up to the region of the heaven. He is bright like fire, when kindled and invoked with oblations. 19

May you raise your voice in the spacious hall of sacrifice to the one, who is the possessor of wealth derived from milk products, and who is able to grant nutritious food. 20

I glorify by night and day that sun (Mitra and Varuṇa), and both the heaven and earth. May you, O sun, ever rise up, bringing enjoyable things for us. 21

We receive from the well-worshipped, and the bliss-bestowing, a well-harnessed and well-going chariot of silver, yoked with a pair of fast-moving horses. 22

Among vital energies, the bay horses, these two are pre-eminently the destroyers of evils, and of those eager in combat the two strong carriers of men. 23

Through this new praise, I welcome at the same moment, the mighty prince, who holds the whip and reins of two fast going, sagacious steeds, the powers. 24

(२६) षड्विंशं सूक्तम्

(१-२५) पञ्चविंशत्यृचस्यास्य सूक्तस्य वैयश्वो विश्वमना आङ्गिरसो व्यश्वो वा ऋषिः । (१-१९) प्रथमाद्येकोनविंशत्यृचामश्विनौ. (२०-२५) विंशत्यादिषण्णां च वायुर्देवताः । (१-१५, २२-२४) प्रथमादिपञ्चदशर्चां द्वाविंश्यादितृचस्य चोष्णिक् (१६-१९, २१, २५) षोडश्यादिचतसृणामेकविंश्याः पञ्चविंश्याश्च गायत्री. (२०) विंश्याश्चानुष्टुप् छन्दांसि ॥

॥२६॥ युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु । अतूर्तदक्षा वृषणा वृषण्वसू ॥१॥
युवं वरो सुषाम्णे महे तने नासत्या । अवोभिर्याथो वृषणा वृषण्वसू ॥२॥
ता वामद्य हवामहे हव्येभिर्वाजिनीवसू । पूर्वीरिष इषयन्तावति क्षपः ॥३॥
आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा । उप स्तोमान्तुरस्य दर्शथः श्रिये ॥४॥
जुहुराणा चिदश्विना मन्येथां वृषण्वसू । युवं हि रुद्रा पर्षथो अति द्विषः ॥५॥

26.

Yuvór u shú ráthaṃ huve sadhástutyaya surishu | átúr- tadakshā vṛishaṇā vṛishaṇvasu || 1 || yuváṃ varo sushámṇe mahé táne nāsatyā | ávobhir yatho vṛishaṇa vṛishaṇvasū || 2 || tá vām adyá havāmahe havyébhir vajinīvasū | pūrvír ishá isháyantāv áti kshapáḥ || 3 || á vāṃ váhishṭho aṣvinā rátho yātu ṣrutó narā | úpa stómān turásya darṣathaḥ ṣriyé || 4 || juhurāṇá cid aṣviná manyethāṃ vṛishaṇvasū | yuváṃ hí rudrā párshatho áti dvíshaḥ || 5 || 26 ||

॥२७॥ दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः । धियंजिन्वा मधुवर्णा शुभस्पती ॥६॥
उप नो यातमश्विना राया विश्वपुषा सह । मघवाना सुवीरावनपच्युता ॥७॥

dasrá hí víṣvam ānushán makshúbhiḥ paridíyathaḥ | dhiyaṃjinvá mádhuvarṇa ṣubhás páti || 6 || úpa no yatam aṣvina rayá viṣvapúsha sahá | maghávanā suvírav ána- pacyutā || 7 ||

26

O twin-divines, possessors of irresistible strength, affluent showerers of blessings, I invoke your wondrous chariot to come amidst noble princes, assembled to celebrate your presence. 1

May you come, O evertrue celebrated, affluent, showerers of wealth, as you have been coming to good chanters of hymns, with your protections to grant them great riches. 2

O affluent in nourishment, sender of plenteous food, we, desiring wealth and wisdom, invoke you on this occasion at dawn with oblations. 3

O twin-divines, leaders of rites, let your renowned, all-conveying chariot come to us, and may you appreciate the praises of the zealous worshipper for his prosperity. 4

O twin-divines, affluent showerers of blessings, detect the guileful; verily, O lords of vitality, lead us safe beyond our foes. 5

O wonder workers, inspirers of intellect, possessors of lovely complexion, lords of rain, may you, being glorified, travel round our sacrifice with your speedy horses and always preserve our wealth from all quarters. 6

Come to us, O twin-divines, with your all-supporting riches, for you are opulent, heroic, and can never be overthrown by anyone. 7

आ मे अस्य प्रतीव्य१मिन्द्रनासत्या गतम् । देवा देवेभिरद्य सचनस्तमा ॥८॥
वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् । सुमतिभिरुप विप्राविहा गतम् ॥९॥
अश्विना स्वृषे स्तुहि कुवित्ते श्रवतो हवम् । नेदीयसः कूळयातः पणीँरुत ॥१०॥

á me asyá pratīvyàm índranāsatyā gatam | devā́ devébhir adyá sacánastamā || 8 || vayáṃ hí vāṃ hávāmaha ukshaṇyánto vyaśvavát | sumatíbhir úpa viprāv ihā́ gatam || 9 || aśvínā sv ṛishe stuhi kuvít te śrávato hávam | nédīyasaḥ kūḷayātaḥ paṇī́ṅr utá || 10 || 27 ||

॥२८॥ वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः । सजोषसा वरुणो मित्रो अर्यमा ॥११॥
युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः । अहरहर्वृषणा मह्यं शिक्षतम् ॥१२॥
यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव । सपर्यन्ता शुभे चक्राते अश्विना ॥१३॥
यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम् । वर्तिरश्विना परि यातमस्मयू ॥१४॥
अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम् । विषुद्रुहेव यज्ञमूहथुर्गिरा ॥१५॥

vaiyaśvásya śrutam narotó me asyá vedathaḥ | sajoshasā váruṇo mitró aryamā́ || 11 || yuvā́dattasya dhishṇyā yuvā́nītasya sūríbhiḥ | áhar-ahar vṛishaṇā máhyaṃ śikshatam || 12 || yó vām yajñébhir ā́vṛitó 'dhivastrā vadhū́r iva | saparyántā śubhé cakrāte aśvínā || 13 || yó vām uruvyácastamaṃ cíketati nṛipā́yyam | vartír aśvinā pári yātam asmayū́ || 14 || asmábhyaṃ sú vṛishaṇvasū yātáṃ vartír nṛipā́yyam | vishudrúheva yajñám ūhathur girā́ || 15 || 28 ||

O Lord of resplendence and O twin-divines, the ever-true, most accessible, come to bless this my work and worship. Come, O divine, today with other divine forces. 8

O bestowers of wealth, like an austere sage, we, desirous of our well-being, invoke you. O sagacious twin-divines, may you come here with all your loving kindness. 9

O seer, praise the twin-divines devoutly, so that they may repeatedly hear your invocation, and destroy the greedy persons, and their associates. 10

O leaders, listen to the son of austere devotee, and understand its purport and may the lord of light, water, and cosmic order listen to me concurrently. 11

O adorable showerers of blessings, bestow upon me day by day some of that wealth, which we yearn for, which is given by you and brought by you for the worshippers. 12

The twin-divines honour the person well and make him prosperous, who is intensely engaged in his duties, just as a bride in her additional raiment. 13

Come, O twin-divines, to the dwelling of him, who so well knows the devotional hymns, to be enjoyed by the leaders (of rites). 14

O affluent showerers of blessings, come to our home, to listen to devotional hymns to be enjoyed by the leader of rites. You bring the sacrifice to completion by devotional praises like the fatal shafts (slaying a deer). 15

॥२९॥ वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा । युवाभ्यां भूत्वश्विना ॥१६॥
यदुदो दिवो अर्णव इषो वा मदथो गृहे । श्रुतमिन्मे अमर्त्या ॥१७॥
उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम् । सिन्धुर्हिरण्यवर्तनिः ॥१८॥
स्मदेतया सुकीर्त्याश्विना श्वेतया धिया । वहेथे शुभ्रयावाना ॥१९॥
युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन्नो वायो मधु पिबास्माकं सवना गहि ॥२०॥

váhishṭho vāṃ hávānāṃ stómo dutó huvan nara | yuvábhyam bhūtv aṣvinā || 16 || yád adó divó arṇavá ishó va mádatho grihé | ṣrutám ín me amartyā || 17 || utá sya ṣvetayávarı váhishṭhā vāṃ nadínām | síndhur híraṇyavartaniḥ || 18 || smád etáya sukırtyáṣvinā ṣvetáya dhiyá | váhethe ṣubhrayavāna || 19 || yukshvá hí tváṃ rathasáha yuvásva póshya vaso | án no vāyo mádhu pibasmákaṃ sávaná gahi || 20 || २९ ||

॥३०॥ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवांस्या वृणीमहे ॥२१॥
त्वष्टुर्जामातरं वयमीशानं राय ईमहे । सुतावन्तो वायुं द्युम्ना जनासः ॥२२॥
वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम् । वहस्व महः पृथुपक्षसा रथे ॥२३॥

táva vayav ṛitaspate tváshṭur jāmatar adbhuta | ávaṅsy á vṛiṇimahe || 21 || tváshṭur jámātaraṃ vayám íṣānaṃ rayá ımahe | sutávanto vayúṃ dyumná jánasaḥ || 22 || váyo yahí ṣivá divó váhasva sú sváṣvyam | váhasva maháḥ prithupákshasa ráthe || 23 ||

O twin-divines, leaders of ceremonial invocations, may my most earnest praise call on you as a messenger; may it be acceptable to you. 16

O immortal twin-divines, listen to me, whether you are at present rejoicing in the water of the firmament, or in the dwelling of the worshipper. 17

Verily, this golden-pathed, bright stream of intelligence is the special bearer of your message among all other media. 18

O twin-divines, following our brilliant songs, come here with all your glorious celebrity, your paths are brightened with light; please come hither. 19

Yoke your chariot, drawing energies, O wind-divine, and O lord of riches; bring those divine energies to cherish our loving devotion. May you come to our daily worship. 20

O divine wind, lord of cosmic sacrifice, and wonderful son-in-law of the sun, we solicit your protection. (*Tvaṣṭṛ*= the sun, of which dawn, the *Uṣa*, is the daughter, wedded to the wind or *Vāyu*). 21

We, the offerers of divine love, solicit riches from the sovereign wind-divine, the son-in-law of the sun, so that we may be prosperous. 22

O auspicious divine wind, may you establish happiness in heaven, and bear quickly your well-yoked chariot. May you yoke the broad-winged horses to this wonderful cosmic chariot. 23

त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे । ग्रावाणं नाश्वपृष्ठं मंहना ॥२४॥
स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः ॥२५॥

tvám̃ hí supsárastamam̃ nṛishádaneshu hūmáhe | grávāṇam̃ náṣvapṛishṭham manhánā || 24 || sá tvám̃ no deva mánasā vā́yo mandānó agriyáḥ | kṛidhí vā́jām̐ apó dhíyaḥ || 25 || ३० ||

(२७) सप्तविंशं सूक्तम्

(१-२२) द्वाविंशत्यृचस्यास्य सूक्तस्य वैवस्वतो मनुर्ऋषिः । विश्वे देवा देवताः । प्रगाथः (विषमर्चां बृहती, समर्चां सतोबृहती) छन्दः ॥

॥३१॥ अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥१॥
आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥२॥
प्र सू न एत्वध्वरो३ऽग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥३॥

27.

Agnír ukthé puróhito grávāṇo barhír adhvaré | ṛicá yāmi marúto bráhmaṇas pátim̃ devā́m̐ ávo vareṇyam || 1 || á paṣúm̃ gāsi pṛithivím̃ vánaspátīn ushásā náktam ósha-dhīḥ | víṣve ca no vasavo viṣvavedaso dhīnám bhūta prā-vitáraḥ || 2 || prá sú na etv adhvarò 'gná devéshu pūrvyáḥ | ādityéshu prá váruṇe dhṛitávrate marútsu viṣvábhānushu || 3 ||

We invoke you to come to the places of the sacred acts of men. You are of a graceful form, liberal like a press-stone, and through your magnitude, you extend your limits in all directions. 24

O divine wind, foremost, joyful in your own mind, may you make our sacred efforts productive of food and drink. 25

27

The fire-divine is the prime force of this cosmic sacrifice. The clouds in heaven and the earth are ready for the initiation ceremony. I invoke with holy verse the vital principles, the masters of sacred knowledge and other Nature's bounties for our much desired protection. 1

Please come to cattle, to earth, to trees, to dawns, to nights, and to plants; may all these Nature's bounties, providers of food and wealth knowing my wishes, be defenders of our pious acts. 2

Let this eternal sacred act of sacrifice proceed first to the adorable Lord, then to Nature's bounties, to the radiant cosmic rays, to vapours of inter-space, who abide to eternal laws and to the all resplendent vital elements of the celestial region. 3

विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः ।
अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥४॥
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥५॥

víṣve hí shmā mánave viṣvávedaso bhúvan vṛidhé ri-ṣádasaḥ | árishṭebhiḥ pāyúbhir viṣvavedaso yántā' no 'vṛi-káṃ chardíḥ || 4 || á no adyá sámanaso gántā víṣve sajó-shasaḥ | ṛicá girá máruto dévy ádite sádane pástye mahi || 5 || 31 ||

॥३२॥
अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥६॥
वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥७॥
आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥८॥
वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद्दूराद्वसवो नू चिदन्तितो वरूथमादधर्षति ॥९॥

abhí priyá maruto yá vo áṣvyā havyá mitra prayā-thána | á barhír índro váruṇas turá nára ādityáso sadantu naḥ || 6 || vayáṃ vo vṛiktábarhisho hitáprayasa ānushák | sutásomāso varuṇa havāmahe manushvád iddhágnayaḥ || 7 || á prá yāta máruto víshṇo áṣvinā púshan mákīnayā dhiyá | índra á yātu prathamáḥ sanishyúbhir vṛíshā yó vṛitrahá gṛiṇé || 8 || ví no deváso adruhó 'chidraṃ ṣárma yachata | ná yád dūrád vasavo nú cid ántito várūtham ādadhárshati || 9 ||

May the universal Nature's forces, providers of opulence, be the strengtheners of men and destroyers of their enemies. May you, who know all things, secure for us dwellings and make them safe from robbers through your unassailable protections. 4

O universal cosmic forces, come to us of one mind and be united together and come this day to us attracted by the sacred praises addressed to you. May you, O vital principles, and the mighty mother Infinity, be with us in our homes to bless us. 5

May you direct your speedy horses to our sacred works; may you, O sun rays, come to accept our offerings. Let the lord of lightning and bliss, and the radiant cosmic rays, as well as the swift leading solar forces, be with us to participate in cosmic sacrifice. 6

We have trimmed the grass for cosmic worship and set the oblations in due order; have tuned devotional songs and kindled the fires. We call you, O virtuous Lord, to come and bless us, as our forefathers had been doing. 7

O vital principles, all-pervading forces, twin-divines and providers of food, may you, induced by our prayers, come hither to me. Let the resplendent Lord, destroyer of evils, showerer of blessings, come to us to grant benefits. 8

May you, O ever-friendly Nature's bounties, bestow on us such a fortification, as is strong on every side, so that no one may assail our defences and attack us from near at hand or from afar. 9

अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥१०॥

ásti hí vaḥ sajātyàm riṣādaso dévāso ásty ā́pyam | prá ṇaḥ pū́rvasmai suvitā́ya vocata makshū́ sumnā́ya návyase || 10 || 32 ||

॥३३॥
इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥११॥
उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥१२॥
देवंदेवं वोऽवसे देवंदेवमभिष्टये ।
देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥१३॥
देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥१४॥

idā́ hí va úpastutim idā́ vāmásya bhaktáye | úpa vo viṣvavedaso namasyúr ā́ñ ásṛikshy ányām iva || 11 || úd u shyá vaḥ savitā́ supraṇītayó 'sthād ūrdhvó váreṇyaḥ | ní dvipā́daṣ cátushpādo arthínó 'viṣran patayishṇávaḥ || 12 || devám̐-devam vó 'vase devám̐-devam abhíshṭaye | devam̐-devam huvema vā́jasātaye griṇánto devyā́ dhiyā́ || 13 || devaso hí shmā mánave sámanyavo víṣve sākám̐ sárātayaḥ | te no adyá té aparám̐ tucé tú no bhávantu varivovídaḥ || 14 ||

O Nature's bounties, destroyers of our adversities, there is a definite kinship and my close alliance with you; therefore, may you call us to our prosperity which we had before, and soon provide fresh happiness. 10

O bounties, lords of all wealth, I offer my homage and greetings composed of unprecedented praise to you to obtain desired affluence. 11

O much-praised (vital principles), when the adorable Lord of all divine lights mounts high in the firmament, then bipeds and quadrupeds and the flying birds, in the fulfilment of their ambitions, are set to their tasks. 12

We invoke every divine force for protection and for the fulfilment of our aspirations. We invoke and glorify with sacred hymns each and every divine force for the acquisition of food. 13

May the universal divine forces be together and with one accord grant gracious gifts to mortal men. May they increase our strength today and hereafter and be the bestowers of wealth upon us and upon our posterity. 14

प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम् ।
न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥१५॥
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥१६॥

prá vaḥ ṣansāmy adruhaḥ **saṃsthá** úpastutīnām | **ná táṃ dhūrtír** varuṇa mitra mártyaṃ yó vo dhā́mabhyó **'vidhat** || 15 || prá sá ksháyaṃ tirate ví mahír ísho yó vo **várāya dā́ṣati** | prá prajā́bhir jāyate dhármaṇas páry árishṭaḥ **sárva edhate** || 16 || ३३ ||

॥३४॥

ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥१७॥
अज्रे चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥१८॥
यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ॥१९॥
यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥२०॥

ṛité **sá vindate** yudháḥ sugébhir **yāty** ádhvanaḥ | ar-yamā́ **mitró várunaḥ** sárātayo yáṃ tráyante sajóshasaḥ || 17 || **ájre cid** asmai kriṇuthā nyáñcanaṃ durgé cid ā́ su-saraṇám | eshā́ cid asmād aṣániḥ paró nú sásredhantī ví **naṣyatu** || 18 || **yád** adyá **sū́rya** udyatí príyakshatrā ṛitáṃ **dadhá** | **yán nimrúci** prabúdhi viṣvavedaso yád vā madhyáṃ-**dine diváḥ** || 19 || **yád** vābhipitvé asurā ṛitáṃ yaté chardír **yemá ví dāṣúshe** | vayáṃ tád vo vasavo viṣvavedasa **úpa** stheyāma **mádhya á** || 20 ||

O faultless divine forces, I glorify you in this congregation. No harm befalls the man who offers oblations and obeys your laws, O the lord of lightning and bliss. 15

The one who offers you sincere dedication verily obtains your blessings. He makes his house spacious and obtains abundant food. Through his pious acts, he leaves ample riches for his progeny and in his family all prosper without any hindrance. 16

Even without war, he (the devotee) gathers wealth, and travels far and wide on pleasant paths. The ordaining, all-friendly, and virtuous cosmic forces, alike in munificence and of one accord, protect him from all sides. 17

You enable him (the devotee) to proceed by an unobstructed road; you grant him easy access to difficult passes. May the shaft of adversities be far from him and vanish without inflicting any injury. 18

O divinity of benevolent vigour, the possessor of all wealth, since at the rising of the sun you preside over the ceremony, and you are present at sunset or at the noon of day; — 19

—or since, O all-wise divine forces, you accept the worship and provide shelter to the worshipper, may we, O possessors of all wealth, be able to come and stay in the midst of you. 20

यद॒द्य सूर॒ उदि॑ते॒ यन्म॒ध्यन्दि॑न आ॒तुचि॑ ।
वा॒मं ध॒त्थ मन॑वे विश्ववेदसो॒ जुह्वा॑नाय॒ प्रचे॑तसे ॥२१॥
व॒यं तद्वः॑ सम्राज॒ आ वृ॑णीमहे पु॒त्रो न ब॑हु॒पाय्य॑म् ।
अ॒श्याम॒ तदा॑दित्या॒ जुह्व॑तो ह॒विर्येन॒ वस्यो॑ऽनशा॑महै ॥२२॥

yád adyá sū́ra údite yán madhyáṃdina ātúci | vāmáṃ dhatthá mánave viṣvavedaso júhvānāya prácetase || 21 || vayáṃ tád vaḥ samrāja ā́ vṛiṇīmahe putró ná bahupā́yyam | aṣyā́ma tád ādityā júhvato havír yéna vásyo 'náṣāmahai || 22 || 34 ||

(२८) अष्टाविंशं सूक्तम्

(१–५) पञ्चर्चस्यास्य सूक्तस्य वैवस्वतो मनुर्ऋषिः । विश्वे देवा देवताः । (१–३, ५) प्रथमादितृचस्य पञ्चम्या ऋचश्च गायत्री, (४) चतुर्थ्याश्च पुर उष्णिक् छन्दसी ॥

॥३५॥ ये त्रि॒ंशति॒ त्रय॑स्प॒रो दे॒वासो॑ ब॒र्हिरास॑दन् । वि॒दन्नह॑ द्वि॒तास॑नन् ॥१॥
वरु॑णो मि॒त्रो अ॑र्य॒मा स्मद्रा॑तिषाचो अ॒ग्नयः॑ । पत्नी॑वन्तो॒ वष॑ट्कृताः ॥२॥
ते नो॑ गो॒पा अ॑पा॒च्यास्त उद॒क्त इ॒त्था न्य॑क् । पु॒रस्ता॒त्सर्व॑या वि॒शा ॥३॥
यथा॒ वश॑न्ति दे॒वास्तथेद॑स॒त्तदे॑षां॒ नकि॒रा मि॑नत् । अरा॑वा च॒न मर्त्यः॑ ॥४॥

28.

Yé triṅṣáti tráyas paró deváso barhír ā́sadan | vidánn áha dvitā́sanan || 1 || váruṇo mitró aryamā́ smádrātishāco agnáyaḥ | pátnīvanto váshaṭkṛitāḥ || 2 || té no gopā́ apācyā́s tá údak tá itthā́ nyàk | purástāt sárvayā viṣā́ || 3 || yáthā váṣanti devā́s táthéd asat tád eshāṃ nákir ā́ minat | árāvā caná mártyaḥ || 4 ||

The divine forces who are possessed of all wealth, bestow the desired opulence upon that wise man, who offers oblations to you at sunrise, at noon or at sunset. 21

O resplendent divine forces, we solicit of you the blessing of your wide protection as a son; may we, O cosmic radiant forces, offering oblations obtain that wealth which shall bring us greater prosperity. 22

28

May the three and thirty divine powers (i.e. 33), come to our sacred place of worship; may they accept our offerings and bestow upon us both sorts of prosperity (material and spiritual). 1

May the divine forces of ocean, the sun, cosmic law and the fires with their consorts, honouring the donors and addressed with the sacrificial exclamation, *Vaṣat* ,— 2

— be our guardians from the west, from the north, from the south, and from the east coming with all their attendants. 3

Whatever these Nature's bounties desire, surely that comes to pass. No one can resist their will and no mortal can withhold their offerings. 4

सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ॥५॥

saptānā́ṃ saptá ṛishṭáyaḥ saptá dyumnā́ny eshām | saptó ádhi śríyo dhire || 5 || ३५ ||

(२९) एकोनत्रिंशं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्य वैवस्वतो मनुर्मारीचः कश्यपो वा ऋषिः । विश्वे देवा देवताः । द्विपदा विराट् छन्दः ॥

॥३६॥

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् । १
योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥१॥ २
वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः । ३
वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥२॥ ४
तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः । ५
पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥३॥ ६
त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति । ७

29.

Babhrúr éko víshuṇaḥ sūnáro yúvāñjy àṅkte hiraṇyáyam || 1 || yónim éka ā́ sasāda dyótano 'ntár devéshu médhiraḥ || 2 || vā́śīm éko bibharti hásta āyasím antár devéshu nídhruviḥ || 3 || vájram éko bibharti hásta ā́hitaṃ téna vṛitrā́ṇi jighnate || 4 || tigmám éko bibharti hásta ā́yudhaṃ śúcir ugró jálāshabheshajaḥ || 5 || pathá ékaḥ pīpāya táskaro yathā́ñ eshá veda nidhīnā́m || 6 || tríṇy éka urugāyó ví cakrame yátra devā́so mádanti || 7 ||

The seven types of forces carry seven appliances; seven are the splendours they possess and they assume seven outstanding glories. 5

29

One of the divines (i.e. one of the behaviours of *manas* or mind) is sustainer, all-pervading, efficiently leading and ever-young, and it decorates itself with gold ornaments. 1

In another (mental behaviour), it is luminous, all-wise among the sense organs, and keeps itself to its place of origin. 2

In another behaviour, it is immovably stationed among Nature's bounties; it brandishes an iron axe in its hands. 3

Another holds the bolt of justice wielding in its hand, wherewith it destroys the devils of evil forces. 4

In another behaviour, it is brilliant and fierce, yet the distributor of healing measures. It holds its sharp weapon in its hands. 5

Another protects the roads like a watchman and knows the places where the hidden treasures lie. 6

Another in three mighty strides taverses along the three regions of time (past, present and future), where the divine forces rejoice. 7

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥४॥ ८
सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती । ९
अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥५॥ १०

víbhir dvā́ carata ékayā
sahá prá pravāséva vasataḥ || 8 || sádo dvā́ cakrāte upamā́
diví samrā́jā sarpírāsutī || 9 || árcanta éke máhi sā́ma manvata téna sū́ryam arocayan || 10 || 36 ||

(३०) त्रिंशं सूक्तम

(१-४) चतुर्ऋचस्यास्य सूक्तस्य वैवस्वतो मनुर्ऋषिः । विश्वे देवा देवताः । (१) प्रथमर्चो गायत्री, (२) द्वितीयायाः पुर उष्णिक्, (३) तृतीयाया बृहती, (४) चतुर्थ्याश्चानुष्टुप् छन्दांसि ॥

॥२७॥ नहि वो अस्त्यर्भको देवासो न कुमारकः । विश्वे सतोमहान्त इत् ॥१॥
इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च ।
मनोर्देवा यज्ञियासः ॥२॥
ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत ।
मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥३॥
ये देवास इह स्थन विश्वे वैश्वानरा उत ।
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥४॥

30.

Nahí vo ásty arbhakó dévāso ná kumārakáḥ | víṣve satómahānta ít || 1 || íti stutáso asathā riṣādaso yé sthá tráyaṣ ca triṅṣác ca | mánor devā yajñiyāsaḥ || 2 || té nas trādhvaṃ tè 'vata tá u no ádhi vocata | mā́ naḥ patháḥ pítryān mānavā́d ádhi dūrā́ṃ naishṭa paravā́taḥ || 3 || yé devāsa ihá sthána víṣve vaiṣvānarā́ utá | asmábhyaṃ ṣárma saprátho gávé 'ṣvāya yachata || 4 || 37 ||

Two (mind and ego) with one bride (the allurement) travel with swift steeds and move like travellers on their way to distant places. 8

These two of like-beauty and of royal rank, when woshipped with oblations of butter (i.e. dedicated devotion) take their seat in heaven. 9

Some, when singing prayers, conceive sacred chants of the Saman, whereby they light up the sun (i.e. the self). 10

30

There is no one among you, O Nature's bounties, who is infant or a youth. Verily all of you are great. 1

You are destroyers of adversities, O divines, adored by men and you are three and thirty and are thus lauded by sacred hymns. 2

May you preserve us and protect, and with benedictions speak to us. May you lead us not afar from the peternal paths of our ancestors, nor from those who are still far away. 3

O Nature's bounties, who are present here, and to whom this entire worship is offered, may you give us, and give to our cattle and horses, wide protection and renowned happiness. 4

[अथ पञ्चमोऽनुवाकः ॥] (३१) एकत्रिंशं सूक्तम्

(१-१८) अष्टादशर्चस्यास्य सूक्तस्य वैवस्वतो मनुर्ऋषिः । (१-४) प्रथमादिचतुर्ऋचां यज्ञो यजमानश्च.
(५-९) पञ्चम्यादिपञ्चानां दम्पती. (१०-१८) दशम्यादिनवानाञ्च दम्पत्याशिषो देवताः ।
(१-८, ११-१३) प्रथमाद्यष्टर्चामेकादश्यादितृचस्य च गायत्री. (९, १४)
नवमीचतुर्दश्योरनुष्टुप् . (१०) दशम्याः पादनिचृत् . (१५-१८)
पञ्चदश्यादिचतसृणाञ्च पङ्क्तिश्छन्दांसि ॥

॥३८॥ यो यजाति यजात इत्सुनवच्च पचाति च । ब्रह्मेदिन्द्रस्य चाकनत् ॥१॥
पुरोळाशं यो अस्मै सोमं ररत आशिरम् । पादित्तं शक्रो अंहसः ॥२॥
तस्य द्युमाँ असद्रथो देवजूतः स शूशुवत् । विश्वा वन्वन्नमित्रिया ॥३॥
अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे । इळा धेनुमती दुहे ॥४॥
या दंपती समनसा सुनुत आ च धावतः । देवासो नित्ययाशिरा ॥५॥

31.

Yó yájāti yájāta ít sunávac ca pácāti ca | brahméd índrasya cākanat || 1 || puroḷā́ṣam yó asmai sómam rárata āṣ́íram | pā́d ít tám ṣakró áṅhasaḥ || 2 || tásya dyumā́ṅ asad rátho devájūtaḥ sá ṣū́ṣuvat | víṣvā vanvánn amitríyā || 3 || ásya prajā́vatī gṛihé 'saṣcantī divé-dive | íḷā dhenumátī duhe || 4 || yá dámpatī sámanasā sunutá á ca dhávataḥ | dévāso nítyayāṣ́irā || 5 || 38 ||

॥३९॥ प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते । न ता वाजेषु वायतः ॥६॥
न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः । श्रवो बृहद्विवासतः ॥७॥
पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः । उभा हिरण्यपेशसा ॥८॥

práti prāṣavyā́ṅ itaḥ samyáñcā barhír āṣāte | ná tā́ vā́jeshu vāyataḥ || 6 || ná devā́nām ápi hnutaḥ sumatím ná jugukshataḥ | ṣrávo bṛihád vivāsataḥ || 7 || putríṇā tā́ kumāríṇā víṣvam ā́yur vy àṣnutaḥ | ubhā́ híraṇyapeṣasā || 8 ||

31

That worshipper, who worships sacrifices, pours the libations and prepares the meals of offerings, pleases the resplendent Lord. 1

The resplendent Lord protects from woe that man who surrenders the cakes of his material gains to Him, and offers the elixir of devotional prayers, blended with the milk of dedication. 2

His chariot of life becomes glorious, guided by divine powers. He subdues all hostilities and becomes prosperous in wealth and children. 3

In his house, flows stream of perpetual abundance of progeny, and are milch kine milked every day. 4

O divines, may the husband and wife who, with one accord, offer the elixir of dedication with pure heart and propiciate you with the milk of sweet devotional prayers, —5

—constantly associated, may they acquire appropriate food, may they be able to offer sacrifice and may they never fail in strength and vigour. 6

May they never deny their reverence and promises to the divines. May they never give up your worship, and may they win wide fame for themselves. 7

Blessed with sons and daughters, may they enjoy their full extent of life, decked with ornaments of gold. 8

वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् ।
समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥९॥
आ शर्म पर्वतानां वृणीमहे नदीनाम् । आ विष्णोः सचाभुवः ॥१०॥

vītíhotrā kritádvasu daṣasyántāmrítāya kám | sám ū́dho romaṣám̐ hato devéshū krinuto dúvaḥ || 9 || ā́ ṣárma párvatānām̐ vriṇīmáhe nadī́nām | ā́ víshṇoḥ sacābhúvaḥ || 10 || ३९ ||

॥४०॥ ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः । उरुरध्वा स्वस्तये ॥११॥
अरमतिरनर्वणो विश्वो देवस्य मनसा । आदित्यानामनेह इत् ॥१२॥
यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः । सुगा ऋतस्य पन्थाः ॥१३॥
अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥१४॥
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१५॥
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१६॥

áitu pūshā́ rayír bhágaḥ svastí sarvadhā́tamaḥ | urúr ádhvā svastáye || 11 || arámatir anarváṇo víṣvo devásya mánasā | ādityā́nām anehā́ ít || 12 || yáthā no mitró aryamā́ váruṇaḥ sánti gopā́ḥ | sugā́ ṛitásya pánthāḥ || 13 || agním̐ vaḥ pūrvyám̐ girā́ devám īḷe vásūnām | saparyántaḥ purupriyám mitrám̐ ná kshetrasā́dhasam || 14 || makshū́ devávato ráthaḥ ṣū́ro vā pṛitsú kā́su cit | devā́nām̐ yá ín máno yájamāna íyakshaty abhī́d áyajvano bhuvat || 15 || ná yajamāna rishyasi ná sunvāna ná devayo | devā́nām̐ yá ín máno || 16 ||

Offering acceptable sacrifices, obtaining the desired wealth, presenting oblations for the sake of immortality, they satisfy the claims of love and pay due honour to the divine powers. 9

We solicit the happiness afforded by the hills, the rivers, and the sun associated with other divine powers. 10

May the lord of nourishment, the possessor of opulence and may the most benevolent, the all-bounteous, come to us auspiciously, and may our path that leads to bliss be wide open for us. 11

All men with devout minds are the unwearied praisers of the irresistable lord of nourishment; He is most virtuous among all the cosmic forces and His gifts are faultless. 12

Since the lord of light, waters and cosmic justice is protecting us, may it become easy to travel along the paths of virtue. 13

I glorify with prayers the adorable Lord, the foremost among the divine forces, to obtain riches. We honour the Lord like a friend who prospers our fields. 14

The chariot of the devoted worshipper moves swiftly like the chariot of a warrior fighting the battle. The man who performs noble acts and who strives to win the favour of divine powers will conquer those who do not worship. 15

Never are you injured, O worshipper; O devoted to God, O the loving devotee, if you honour divine powers. The man who performs noble acts and who strives to win the favour of divine powers will conquer those who do not worship. 16

नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१७॥
असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१८॥

nákish ṭám kármaṇā naṣan ná prá yoshan ná yoshati | devā́nām yá ín máno — || 17 || ásad átra suvī́ryam utá tyád āṣváṣvyam | devā́nām yá ín máno — || 18 || 40 ||

(३२) द्वात्रिंशं सूक्तम्
(१-३०) त्रिंशदृचस्यास्य सूक्तस्य काण्वो मेधातिथिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ॥

॥१॥ प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत ॥१॥
यः सृबिन्दुमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः ॥२॥
न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ॥३॥
प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि । हुवे सुशिप्रमूतये ॥४॥

32.

Prá kritā́ny ṛijīshíṇaḥ káṇvā índrasya gā́thayā | máde sómasya vocata || 1 || yáḥ sṛíbindam ánarṣanim píprum dāsám ahīṣúvam | vádhīd ugró riṇánn apáḥ || 2 || ny árbudasya vishṭápam varshmā́ṇam bṛihatás tira | kṛishé tád indra paúṅsyam || 3 || práti ṣrutā́ya vo dhṛishát tū́rṇāṣam ná giér ádhi | huvé susiprám ūtáye || 4 ||

No one obstructs him in his action, and never can he be restrained from performing his duties, and none can separate him from his family nor can the family desert him. The man who performs noble acts and who strives to win the favour of divine powers will conquer those who do not worship. 17

The unparalleled heroic strength belongs here to him and he alone is the possessor of swift vigour and vitality; the man who performs noble acts and who strives to win the favour of divine powers will conquer those who do not worship. 18

32.

Wise devotees glorify with songs the great deeds of the resplendent Lord, ever full with exhilaration of spiritual joy. 1

The fierce Lord subdues wicked, violent, greedy and crooked tendenices and liberates the stream of virtuous thoughts. 2

May you pierce the vast stronghold of the cloud of evil thoughts; O resplendent Lord, achieve this manly exploit. 3

I invoke the victorious handsome resplendent Lord for your protection and to hear your praises, as (a thirsty traveller) invokes water to come down from the clouds. 4

स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ॥५॥

sá gór áṣvasya ví vrajám mandānáḥ somyébhyaḥ | púram ná ṣūra darshasi || 5 || 1 ||

॥२॥ यदि मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ॥६॥
वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥७॥
उत नः पितुमा भर संरराणो अविक्षितम् । मघवन्भूरि ते वसु ॥८॥
उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ॥९॥
बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥१०॥

yádi me rāráṇaḥ sutá ukthé vā dádhase cánaḥ | ārā́d úpa svadhā́ gahi || 6 || vayám ghā te ápi shmasi stotā́ra indra girvaṇaḥ | tvám no jinva somapāḥ || 7 || utá naḥ pitúm ā́ bhara saṃrarāṇó ávikshitam | mághavan bhū́ri te vásu || 8 || utá no gómatas kṛidhi híraṇyavato aṣvínaḥ | íḷābhiḥ sáṃ rabhemahi || 9 || bṛibádukthaṃ havāmahe sṛiprákarasnam ūtáye | sā́dhu kṛiṇvántam ávase || 10 || 2 ||

॥३॥ यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ॥११॥
स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः ॥१२॥
यो रायो३ऽवनिर्महान्त्सुपारः सुन्वतः सखा । तमिन्द्रमभि गायत ॥१३॥

yáḥ saṃsthé cic chatákratur ā́d īṃ kṛiṇóti vṛitrahā́ | jaritṛíbhyaḥ purūvásuḥ || 11 || sá naḥ ṣakráṣ cid ā́ ṣakad dā́navāñ antarabharáḥ | índro víṣvābhir ūtíbhiḥ || 12 || yó rāyò 'vánir mahā́n supāráḥ sunvatáḥ sákhā | táṃ índram abhí gāyata || 13 ||

Through the ecstasy of spiritual joy, O resplendent Lord, you throw open the doors of the pastures of wisdom (cows) and vitality (horses), as if from a hostile city. 5

If my tributes and praises deligh you and you take pleasure in my laudation, come to me with your divine personality even from afar. 6

O resplendent Lord, the one adored by praises, O lover of devotion, we are your adorers; may you, therefore, be generous unto us. 7

And pleased by us, O bounteous Lord, bring us still undiminished wealth and food which you possess in plenty. 8

Make us possessed of wisdom, wealth of gold, and vitality. May we exert ourselves in consonance with divine words. 9

Let us call Him for help whose arm is stretched out for the protection of others, and who strives nobly to defend us. 10

He is the performer of cent per cent selfless noble acts the destroyer of devil of ignorance, and provides ample wealth of wisdom to his sincere worshippers. 11

May the all-powerful one give us strength, and may the resplendent Lord, along with all the protections, satisfy our needs. 12

Glorify that resplendent Lord who is mighty and is the preserver of riches, the saviour of devotees and friend of the offerers of libation. 13

आयन्तारं महि स्थिरं पृतनासु श्रवोजितम् । भूरेरीशानमोजसा ॥१४॥
नकिरस्य शचीनां नियन्ता सूनृतानाम् । नकिर्वक्ता न दादिति ॥१५॥

āyantáram máhi sthirám pṛítanāsu ṣravojítam | bhū́rer íṣānam ójasā || 14 || nákir asya ṣácīnām niyantá sūnṛítānām | nákir vaktá ná dād íti || 15 || 3 ||

॥४॥ न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् । न सोमो अप्रता पपे ॥१६॥
पन्य इदुप गायत पन्य उक्थानि शंसत । ब्रह्मा कृणोत पन्य इत् ॥१७॥
पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः । इन्द्रो यो यज्वनो वृधः ॥१८॥

ná nūnám brahmáṇām ṛiṇám prāṣūnā́m asti sunvatā́m | ná sómo apratá́ pape || 16 || pánya íd úpa gāyata pánya ukthā́ni ṣaṅsata | bráhmā kṛiṇota pánya ít || 17 || pánya ā́ dardirac chatá sahásra vājy ávṛitaḥ | índro yó yájvano vṛidháḥ || 18 ||

वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः । इन्द्र पिब सुतानाम् ॥१९॥
पिब स्वधैनवानामुत यस्तुग्र्ये सचा । उतायमिन्द्र यस्तव ॥२०॥

ví shú cara svadhā́ ánu kṛishṭīnā́m ánv āhúvaḥ | índra píba sutā́nām || 19 || píba svádhainavānām utá yás túgrye sácā | utāyám indra yás táva || 20 || 4 ||

(Glorify Him) who is always near us, who is mighty, and firm to help us in our struggles, and leads us to glorious victories. He is the lord of vast riches through his superior prowess. 14

No one puts a limit to His blessings and no one can complain that He is not generous. 15

Verily, no debt (of Nature's bounties) is due to those devotees who are actively engaged in the extraction of devotional elixir. The elixir is not to be enjoyed by those who are miser and non-liberal. 16

May you sing praises to the revered (Lord), repeat prayers to Him who alone is revered; address hymns to the revered resplendent Lord. 17

The powerful resplendent Lord, the discomforter of hundreds and thousands, the one unobstructed by adversities, is worthy of reverence. He is the benefactor of the worshippers. 18

May you, who are to be invoked by men, come to those who call you with devotion. May you accept, O the resplendent Lord, and enjoy the loving prayers they offer. 19

May you drink and relish these devotional elixirs from the plants, purchased in exchange of milch cows, and which have been mixed with water. They are, O resplendent Lord, your own. 20

॥५॥ अतीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब ॥२१॥
इहि तिस्रः परावत इहि पञ्च जनाँ अति । धेना इन्द्रावचाकशत् ॥२२॥
सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः । निम्नमापो न सध्र्यक् ॥२३॥
अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे । भरा सुतस्य पीतये ॥२४॥
य उद्नः फलिगं भिनन्न्यक्सिन्धूँरवासृजत् । यो गोषु पक्वं धारयत् ॥२५॥

átīhi manyushāvíṇaṃ sushuvā́ṅsam upā́raṇe | imáṃ rātáṃ sutáṃ piba || 21 || ihí tisráḥ parāváta ihí páñca jánāṅ áti | dhénā indrāvacákaṣat || 22 || sū́ryo raṣmíṃ yáthā srijá tvā yachantu me gírah | nimnám ā́po ná sadhryàk || 23 || ádhvaryav ā́ tú hí shiñcá sómaṃ vīrā́ya ṣipríṇe | bhárā sutásya pītáye || 24 || yá udnáḥ phaligám bhinán nyàk síndhūṅr avásrijat yó góshu pakváṃ dhāráyat || 25 || 5 ||

॥६॥ अहन्वृत्रमृचीषम और्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् ॥२६॥
प्र व उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत ॥२७॥
यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः । इन्द्रो देवेषु चेतति ॥२८॥

áhan vritráṃ ṛícīshama aurṇavābhám ahīṣúvam | himénāvidhyad árbudam || 26 || prá va ugrā́ya nishṭuré 'shāḷhāya prasakshíṇe | deváttam bráhma gāyata || 27 || yó víṣvāny abhí vratā́ sómasya máde ándhasaḥ | índro devéshu cétati || 28 ||

May you ignore him who offers libation in angry mood or who presents on a disapproved spot. May you accept the devotion of those who offer with love. 21

O resplendent Lord, having listened to our invocations, may you proceed over the great distances in three directions (from the back, from the front and from the sides) and pass over all the five types of men. 22

May you send forth your riches to me as the sun disperses the rays; let my songs attract you hitherward as waters run to low levels. 23

O the sacrificer, may you quickly offer your devotion to the resolute resplendent self of pleasant appearance; may you offer devotional songs to Him for His acceptance, — 24

—to Him who cleaves the dark clouds of ignorance and lets loose pure thoughts for their free flow and sets the matured thoughts in men like ripe milk in the kine. 25

The brilliant resplendent Lord destroys evil thoughts, smites down the obstructive forces, puts an end to the poisonous tendencies, and pierces through dark clouds of doubts and ambiguities. 26

May you sing aloud your praises inspired by your divine instinct to the one who is matchless, unconquerable and subduer of the evil passions. 27

The resplendent Self, through the ecstacy of spiritual joy, inspires all virtuous thoughts among men of divine nature. 28

इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥२९॥
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥३०॥

ihá tyá sadhamádyā hárī híraṇyakeṣyā | voḷhám abhí práyo hitám || 29 || arváñcām tvā purushṭuta priyámedhastutā hárī | somapéyāya vakshataḥ || 30 || 6 ||

(३३) त्रयस्त्रिंशं सूक्तम्

(१-१९) एकोनविंशत्यृचस्यास्य सूक्तस्य काण्वो मेध्यातिथिर्ऋषिः । इन्द्रो देवता । (१-१५) प्रथमादिपञ्चदशर्चां बृहती, (१६-१८) षोडश्यादितृचस्य गायत्री, (१९) एकोनविंश्याश्चानुष्टुप् छन्दांसि ॥

॥७॥

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥१॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥२॥
कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥३॥

33.

Vayáṃ gha tva sutávanta ápo ná vṛiktábarhishaḥ | pavítrasya prasrávaṇeshu vṛitrahan pári stotára āsate || 1 || sváranti tvā suté náro váso nireká ukthínaḥ | kadā́ sutám trishāṇá óka ā́ gama índra svabdīva váṅsagaḥ || 2 || káṇvebhir dhṛishṇav ā́ dhṛishád vā́jaṃ darshi sahasríṇam | piṣāṅgarūpam maghavan vicarshaṇe makshū́ gómantam īmahe || 3 ||

May those two beautiful powers, like golden-maned steeds, share rewards worn by you; may they convey you to the place of loving food-offerings. 29

O much-praised Lord, may these twin powers praised by all benevolent intellectuals bring you here to accept our devotional prayers. 30

33

We are pouring forth to you the devotional prayers like water. Our heart is pure and full of devotion. The praisers adore you, O destroyer of evils, at the ceremony where the streams of pious prayers are oozing water from filters. 1

The leaders of the ceremony, repeating praises, call you, O Lord of riches, to the foremost place; when do you, O resplendent Lord, come to drink the elixir of sweet devotional prayers, as a thirsty bellowing bull to the home? 2

O resolute resplendent Lord, may you bestow abundantly upon wise men thousands of benefits; O the all-seeing bounteous Lord, we earnestly solicit you for the speedy availablity of the splendid wealth of gold and matured wisdom. 3

पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥४॥
यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥५॥

pāhí
gā́yā́ndhaso máda índrāya medhyātithe | yáḥ sámmiṣlo háryor yáḥ suté sácā vajrī́ rátho hiraṇyáyaḥ || 4 || yáḥ sushavyáḥ sudákshiṇa inó yáḥ sukrátur griṇé | yá ākaráḥ sahásrā yáḥ ṣatámagha índro yáḥ pūrbhíd āritáḥ || 5 || 7 ||

॥८॥ यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥६॥
क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥७॥
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥८॥
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥९॥

yó dhṛishitó yó 'vṛito yó ásti ṣmáṣrushu ṣritáḥ | víbhūtadyumnaṣ cyávanaḥ purushṭutáḥ krátvā gaúr iva ṣākináḥ || 6 || ká īṃ veda suté sácā píbantaṃ kád váyo dadhe | ayáṃ yáḥ púro vibhinátty ójasā mandānáḥ ṣipry ándhasaḥ || 7 || dānā́ mṛigó ná vāraṇáḥ purutrā́ caráthaṃ dadhe | nákish ṭvā ní yamad ā́ suté gamo maháṅṣ carasy ójasā || 8 || yá ugráḥ sánn ánishṭṛita sthiró ráṇāya sáṃskṛitaḥ | yádi stotúr maghávā ṣṛiṇávad dhávaṃ néndro yoshaty ā́ gamat || 9 ||

O adorable guest, may you, in the exhilaration of pure joy, sing prayers to the resplendent Lord who, harnesses His horses when glorified. He is the wielder of bolt of justice and His chariot shines like gold. 4

He is the resplendent self, who is spoken of as having strong hands, both right and left; He is most wise and performer of great acts; He is rich in thousands, and has hundreds of bounties; He is the demolisher of strogholds of adversities. 5

He is the subduer of evil forces, the unresisted, a confident fighter in the struggles, possessor of vast wealth, the over-thrower of foes, much lauded and by his acts of bounty is like a milch-cow to His worthy devotee. 6

No one knows what vital drinks He enjoys when devotional prayers are offered to Him and when and what foods He takes! He looks resolute as a man having strong jaws; exhilarated by the spiritual joy, He breaks down the strongholds of evil forces by His strength. 7

May you come to the place of worship like a wild elephant who rushes on, this way and that way, mad with heat; no one can bind you, yet come hither to the place of worship; verily, you move mighty with your strength. 8

He is powerful, never overthrown by foes, steadfast and always ready to fight the evil. When the bounteous Lord hears the invocation of an adorer, He does not stand aloof. He is sure to come. 9

सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥१०॥

satyám itthā́ vŕ̥shéd asi vŕ̥shajūtir nó 'vr̥itaḥ | vŕ̥shā hy ùgra ṣr̥iṇvishé parāváti vŕ̥sho arvāváti ṣrutáḥ || 10 || ८ ||

॥९॥ वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥११॥
वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर ।
वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥१२॥
एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।
नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः ॥१३॥

vŕ̥shaṇas te abhī́ṣavo vŕ̥shā káṣā hiraṇyáyī | vŕ̥shā rátho maghavan vŕ̥shaṇā hárī vŕ̥shā tvám ṣatakrato || 11 || vŕ̥shā sótā sunotu te vŕ̥shann r̥ijīpinn ā́ bhara | vŕ̥shā dadhanve vŕ̥shaṇam nadíshv ā́ túbhyam sthātar harīṇām || 12 || éndra yāhi pītáye mádhu ṣavishṭha somyám | nā́yám áchā maghávā ṣr̥iṇávad gíro bráhmokthā́ ca sukrátuḥ || 13 ||

वहन्तु त्वा रथेष्ठामा हरयो रथयुजः ।
तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥१४॥
अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥१५॥

váhantu tvā ratheshṭhā́m ā́ hárayo rathayújaḥ | tirā́ṣ cid aryám sávanāni vr̥itrahann anyéshām yā́ ṣatakrato || 14 || asmā́kam adyántamam stómam dhishva mahāmaha | asmā́kam te sávanā santu ṣámtamā mádāya dyuksha somapāḥ || 15 || ९ ||

Verily, you are a showerer of blessings; inspired by vigorous actions, you come to us. You are unarrested by adversities and celebrated as a showerer of benefits from all the places, near and far. 10

O performer of hundreds of selfless acts, your controlling powers, the reins, are showerers of blessings and such is your golden whip. O bounteous Lord, your chariot is the showerer of benefits and such are your twin-horses and you yourself are the showerer of blessings. 11

O showerer of blessings, may the offerer present to you the devotional love as a showerer; O straight-going Lord, bring us wealth; O controller of the horses, the showerer is effusing out prayers to be offered to you which will flow like rivers. 12

Come, O most powerful resplendent Lord, to drink the elixir of devotion. This bounteous person, the achiever of sacred exploits, does not hear the prayers, the chants, and the hymns till He comes. 13

O performer of hundreds of sacred acts, the destroyer of evils, let your powers, yoked to your car, bring you here. O Lord, may you mount on the chariot and avoiding other offerers, come here swiftly. 14

O greatest of the great, may you accept our laudation as nearest to your heart. May our libations be most successful in exciting your exhilaration. 15

॥१०॥ नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति । यो अस्मान्वीर आनयत् ॥१६॥
इन्द्रश्चिद्घा तदब्रवीत्स्त्रिया अशास्यं मनः । उतो अह क्रतुं रघुम् ॥१७॥
सप्ती चिद्घा मदच्युता मिथुना वहतो रथम् । एवेद्धूर्वृष्ण उत्तरा ॥१८॥
अधः पश्यस्व मोपरि संतरां पादकौ हर ।
मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ ॥१९॥

nahí shás táva nó máma ṣāstré anyásya ráṇyati | yó asmā́n vīrá ā́nayat || 16 || índraṣ cid ghā tád abravīt striyā́ aṣāsyám mánaḥ | utó áha krátuṃ raghúm || 17 || sáptī cid ghā madacyútā mithuná vahato rátham | evéd dhū́r vṛíshṇa úttarā || 18 || adháḥ paṣyasva mópári saṃtarā́ṃ pādakaú hara | mā́ te kaṣaplakaú dṛiṣan strí hí brahmā́ babhū́vitha || 19 || 10 ||

(३४) चतुस्त्रिंशं सूक्तम्

(१–१८) अष्टादशर्चस्यास्य सूक्तस्य (१–१५) प्रथमादिपञ्चदशर्चां काण्वो नीपातिथिः, (१६–१८) षोडश्यादितृचस्य चाङ्गिरसाः सहस्रं वसुरोचिष ऋषयः । इन्द्रो देवता । (१–१५) प्रथमादिपञ्चदशर्चामनुष्टुप्, (१६–१८) षोडश्यादितृचस्य च गायत्री छन्दसी ॥

॥११॥ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१॥
आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥२॥

34.

Éndra yāhi háribhir úpa káṇvasya sushṭutím | divó amúshya ṣā́sato divám yayá divāvaso || 1 || ā́ tvā grā́vā vádann ihá somí ghósheṇa yachatu | divó amúshya — || 2 ||

The brave resplendent, who guides us, does not take delight in giving punishments, either to you, or to me, or to anyone else. 16

This is what, verily, the resplendent Lord speaks; the mind of women is sensitive and delicate and resists control and their intellect works through emotions under limitations. 17

The pairs of horses of the resplendent Self rushing in exhilaration, draw His chariot; the pole of the showerer of universe rests upon them. 18

Cast your eyes downward, not upward; keep your feet close together; let none see your ankles, for now you, the creator, have become a woman. 19

34

Come, O resplendent, with your quick measures to receive the praises of wise devotees. O Lord, radiant while glorified, may you controlling the yonder celestial space return to your region. 1

May the repeated voices of praises, as if of the grinding stone, bring you here with ringing voice. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 2

अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥३॥
आ त्वा कण्वा इहावसे हवन्ते वाजसातये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥४॥
दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥५॥

átrā ví nemír eshām úrām ná dhūnute vṛíkaḥ | divó amúshya — || 3 || ā́ tvā káṇvā ihā́vase hávante vā́jasātaye | divó amúshya — || 4 || dádhāmi te sutā́nām vṛíshṇe ná pūrvapā́yyam | divó amúshya — || 5 || 11 ||

स्मत्पुरन्धिर्न आ गहि विश्वतोधीर्न ऊतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥६॥
आ नो याहि महेमते सहस्रोते शतामघ ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥७॥
आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥८॥
आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥९॥

smátpuraṃdhir na ā́ gahi viṣvátodhīr na ūtáye | divó amúshya — || 6 || ā́ no yāhi mahemate sáhasrote ṣátāmagha | divó amúshya — || 7 || ā́ tvā hótā mánurhito devatrā́ vakshad íḍyaḥ | divó amúshya — || 8 || ā́ tvā madacyútā hárī ṣyenám pakshéva vakshataḥ | divó amúshya — || 9 ||

The stone's rim shakes the herbal stems at this ceremony like a wolf terrifying a sheep. O Lord, radiant while glorified, may you, controlling the yonder space, return to your region. 3

The wise devotees invoke you here for protection and for food. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 4

I make offering to you, O showerer, of the libations as the first drink. O Lord, radiant while glorified, may you controlling the yonder celestial space, return to your region. 5

May you, the master of the family of celestial region, and the sustainer of the universe, come to us for our protection. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 6

O sagacious Lord, bestower of infinite wealth and numerous protections, come to us. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 7

May the invoker, the divine force behind the fire, most adorable among the bounties, benefactor of man, bring you here. O Lord, radiant while glorified, may you controlling the yonder celestial space, return to your region. 8

Let your pair of vigorous physical and spiritual powers, humiliators of the pride of foes, bring you as two wings of the falcon bring him on the earth. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 9

आ याह्यर्य आ परि स्वाहा सोमस्य पीतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१०॥

á yāhy aryá ā pári svā́hā sómasya pītáye | divó amúshya — || 10 || 12 ||

॥१२॥

आ नो याह्युपश्रुत्युक्थेषु रणया इह ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥११॥
सरूपैरा सु नो गहि संभृतैः संभृताश्वः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१२॥

á no yāhy úpaṣruty ukthéshu raṇayā ihá | divó amúshya — || 11 || sárūpair á sú no gahi sámbhṛitaiḥ sámbhṛitāṣvaḥ | divó amúshya — || 12 ||

आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१३॥
आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१४॥
आ नः सहस्रशो भरायुतानि शतानि च ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१५॥

á yāhi párvatebhyaḥ samudrásyádhi vishṭápaḥ | divó amúshya — || 13 || á no gávyāny áṣvyā sahásrā ṣūra dardṛihi | divó amúshya — || 14 || á naḥ sahasraṣó bharāyútāni ṣatáni ca | divó amúshya — || 15 ||

Come, O Lord, from whatever direction, to accept our devotional prayers, ending with the syllable – SWAHA. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 10

May you come to listen our praises when they are repeated and take delight in our laudations. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 11

O Lord of highly-energized speedy powers, come to us with your well-fed forces, alike in functions. O Lord, radiant while glorified, may you controlling the yonder celestial space, return to your region. 12

Come from the mountains, from above the region of the firmament. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 13

O hero, may you bestow upon us wealth in thousands, both of wealth and vigour. O Lord, radiant while glorified, may you, controlling the yonder celestial space, return to your region. 14

